कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीगणेशाय नमः ॥ श्रीरामः ॥ लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं भारद्वाजकुलो-
बुधैर्विधुमिव श्रीगौरिबान्याबुधात् ॥ ज्ञात्वाशेषमतं मितेन वचसा सिद्धांतमुक्तावली
गूढार्थं सनुते यथामति महादेवः परेषां कृते ॥१॥ भाषापरिच्छेदव्याख्यानं चिकीर्षुः श्रीवि-
श्वनाथपंचाननो निर्विघ्नपरिसमाप्तिसिद्धये कृतस्य स्वरनिर्देशरूपमंगलस्य शिष्यशिक्षार्थं
निबंधं कुर्वन्नीश्वरं प्रार्थयते । चूडामणिकृतेति । लीलेति ॥ इदं विशेष्यमानात्तः पुनराते सं-
दोषः ॥ वस्तुतस्तु ॥ विधोः किमिति चूडाकरणं किमर्थं वास्तु केवलयीकरणं इत्याकांक्षा-
यां निराकांक्षप्रतिपत्तिर्न भवतीति लीलेत्यादि विशेषणानुक्तौ विवक्षितान्वयबोधाभावात्
नायमत्र दोषः ॥ तथाप्याकांक्षाया विशेषणान्वय एव तत्प्रसरादिति ॥ लीलया तांडवं न्यसे
सत्रपंडितः अधिज्ञैरसर्थः ॥ अनेन च नृत्यविशिष्टतया स्मृतिविषयात् प्रार्थिता अर्था भवंति
एवेति सूचितं ॥ नन्वाभूषणरतिते कथं न संततात । चूडामणिकृतेति ॥ अचूडामणिश्चूडा-
मणिः संपद्यते इति चूडामणिकृतः चूडामणीकृतो विधुर्येन सः तथेत्यर्थः ॥ वलयीकृतेति ॥
चं. उपरिकुसुमदवं पुरियादे ४ ८ शेषा अप्येवं कुर्युरिति ८ १ ॥

Acc. NO. ~~295.~~ M.1550
Title - सिद्धान्तमुक्तावलीटीका. (गूढार्थ)
Author - महादेव भट्ट.
Date - ?
Sub - न्याय.
folio - 116.
Xerox - 230

KKSU LIBRARY
RAMTEK
441 106
M. 1550
Dist Nagpur

Checked 2012-2

अवलयं वलयं संपद्यत इति वलयाकृतो वलयीकृतो वासुकिर्येन सः तथेत्यर्थः॥ शिष्यावधानाय प्र
तिजानीते॥ निजनिर्मितेति॥ निजेन स्वेन निर्मिता रचिता या कारिकावली तां अत्यंतं संक्षेपः
शब्दसंक्षेपो यासु ताः अतिसंक्षिप्तास्तादृश्यश्च ताश्चिरंतनानां कणादप्रभृतीनां उक्तयो व
चांसि वचः प्रतिपाद्या युक्तयः ताभिः कृत्वाहं विशदीकरवाणि॥ प्रकटीकरोमीत्यर्थः॥ ननु लीलावत्या
दिप्राचीननिबंधाध्ययनेनैव कारिकावलीप्रतिपादितोऽर्थो बोद्धुं शक्यः इति किमनेन भवत्कृ
ताविशदानिबंधेनेत्यत उक्तमतिसंक्षिप्तेति। तथा च लीलावत्यादिप्राचीननिबंधेषु ग्रंथ
बाहुल्येन तु बहुतरदुःखहेतुप्रतिपत्तिकृतया न बालानां प्रवृत्तिरिति भावः॥ स्वोत्प्रेक्षा
मूलकत्वप्रयुक्तानादरणीयतां निरासितुं चिरंतनेत्युक्तं॥ नन्वित्यवधारणे॥ तथा च कुतुका
देवेत्यर्थः॥ एतेन स्वस्य ग्रंथकरणे क्लेशाभावः सूचितः॥ स्वस्य ग्रंथकरणे प्रवृत्तौ निमि
त्तमाह राजीवेति॥ राजीवे या दयासपाते या वशंवदः तदधीन इत्यर्थः॥ ननु ग्रंथादौ श्रो

स्रा१ तै१

त वक्तव्येप्रयोजनादिवक्तव्यं भवति स्यचेतानुत्तं [illegible] दुपेक्षणीयं तत्र ग्रंथस्य स्यादि[illegible]या
शं यविषयप्रयोजनसं[illegible]बंधाधिकारिणः सूचयन्नाति संक्षिप्तत्वादेतद्ग्रंथस्य स
क लपदार्थप्रतिपादकतया कथं बालस्य व्युत्प[illegible]त्ति रिति मांच शंकामे[illegible]तं[illegible]थ ग्रं३
स्य सकलपदार्थप्रतिपादकत्वमदर्शनेन परिहरन्न्यत्र कोशेषि यदे[illegible]सि य[illegible]ज्जुहो स्रा४
पि द्धासिता[illegible]त पस्यासि कौंतेय तत्कुरुष्व मदर्पणमिति भगवदुक्तेर्मुक्तावलीस
मं चोक्तियज्ञं थं श्रीभगवति चा[illegible]पयन् शिष्याणां स्वा[illegible]नुप्रामाणिकताबोधा
य तं ग्रंथस्य स्वेच्चनाम[illegible]नीमिबध्नाति।। सद्रव्येति। द्रव्यैसहिता युक्ताप्रतिपा
द कतया। गुणैरपि गुंफितां युक्ता। सत्तामुक्षेपणादीनां पञ्चानां कर्मणां ज्ञापि
० बोधिका। स जाति रूपं सामान्यं विशेषो निसः समवायस्तो। मीलिता। यद्दासंति ।।२
स्नि४

सामान्यविशेषाणि सम्मिलितानि यस्यां। निसम्मिलितं निसर्सबंधा। आभावप्रकर्षैः प्रा
वीरगभ्नाँदिभेदेन वैलक्षिण्यं तस्याः ज्वलाप्रकाशिके षाँ [illegible] यस्याः सिद्धांतमुक्ताव
ली। सिद्धांता एव मुक्तास्तासां आवाली पंक्तिर्विशिष्टा नीरोस्य वक्षसि वक्षस्य पणर
ले विन्यस्ता विशेषतो [illegible]र्पिता सुकृतिनां पंडितानां मनसः मुदे सन्तोषं
ब चिरं [illegible]कुकालं वितनुतां विस्तारयत्विति यथा तनुयुक्तौ नाम व्याससहा रुकथे वि
दुषां संतोषस्तत्राह। सयुक्तिरिति। स सा युक्तयो यस्यां सा तथा। मुक्तावलीं
सादृश्यं च नवशेष द्रव्यादिपदार्थवत्तया। तथाहि। मुक्तावलीसद्रव्या साध्य
वस्तुयाद्रव्यवती द्रव्यसाध्या तिथावत्नानाविध द्रव्यरचिता वा गुणेन
सूत्रेण गुंफिता निर्मिता। सुकृतिनां पुण्यवतां यानि सामि चीनाँ भगवद्रजना
नि

दिरूपाप्रीतिर्वाबोधिकास्य सामान्यसमाचीना इति विशेषो महत्वेनिर्मलत्वादि [illegible] सा [illegible] नियमनवरतं मिलिता संब
द्धा। अभावे नेजोभावे धिकारे सति प्रक [illegible] जोलद्वी थप्रकाशिके ति द्रव्यादिसकलपदार्थवितीतथा यत्र यथोपीति। अ
त्रेच पुत्रावलिच्यो स्या निर्बाधो च सूचितं। अत्र द्रव्यादिपदार्थप्रतिपादकच्यप्रदर्शनेन द्रव्यादयो वि[illegible]षया उक्ताः
पदार्थतत्त्वावधारणं च प्रयोजनं सूचितं। संबंधश्च प्रतिपाद्यप्रतिपादकभावः। पदार्थतत्त्वावधारणकामोऽत्र
धिकारीति। ग्रंथारंभसमये कृतस्य मंगलस्य तन्निबंधस्य च वैयर्थ्यमाशंक्य फलं दर्शयति। विघ्नविघाता
येति। प्रारब्धुमिष्टस्य ग्रंथस्येति शेषः। यद्यप्यत्र घातपदं ध्वंसोत्पत्तिमदभावपरं तथापि पदमनर्थकमिति
प्रतिभाति। तथापि विशिष्टवाचकानां पदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्यमात्र
परतायाः सकीचकैर्मारुतपूर्णरंध्रैरित्यत्र कीचकावेणवस्ते स्युर्ये स्वनंत्यनिलोद्धता इति कोशान्मारुत वे३
पूर्णरंध्रत्वविशिष्टवेणुबोधककीचकपदे दृष्टत्वाद्घातपदमभावमात्रपरं द्रष्टव्यं। ननु नि [illegible]
ष्फलत्वान्मंगलाचरणमयुक्तं न च निष्फलत्वमेवासिद्धं। तस्य फलविशेषस्यान्यत्र स्वरूपहेतुनो तत्ता ॥३॥

प२ य५ स३
धनादिसंनिधिप्रायेणाशंकते। नविनेति॥ मंगलस्यकारणत्वाभावेव्यतिरेकव्यभिचाररूपेतेनुमा
तं। विनापीति॥ निर्विघ्ने रिसमाप्तीति। विघ्नध्वंसपूर्वकसमाप्तिरिति भावः॥ नचैतत्र
जन्मांतरीयमंगलकल्पनान्नाव्यभिचारइतिवाच्यं॥ भोगादिनापि नास्ति काँनिवि
घ्ननाशसंभवेनजन्मांतरीयमंगलसंदेहेनव्यभिचारसंशयसंभवात्॥ अत्रेका
दंबर्यादिग्रंथेमंगलसत्वेपिसमाप्तेरदर्शनेनान्वयव्यभिचारोपिदोषोबोध्यः॥ व्यभिचा
रसंदेहस्यमाध्येसंशयरूपतयाकारणताप्रत्यक्षएवप्रतिबंधकत्वंनत्वनुमितौ
तत्रैतस्यानुकूले [illegible] त्वादिसंनिप्रायवान्मंगलंसमाप्तिफलकंसमाप्त्यन्याफलक
त्वेसतिसफलत्वादितिपरिशेषानुमानेनमंगलस्यसमाप्तिफलकत्वं॥ नोव्यवस्थापयि
ष्यंन प्रथमतोवि[illegible]शेष्यासिद्धिनिरासायफलवत्त्वंसाधयति। अविगीतेति॥ वि

४=साध्य=४
भेदघटितानुमानेन२

पय[illegible]ंचज्ञानविषयत्वासुखेऽतिप्रसक्तमत आह॥ आचारेति॥ आचारस्यात्र यद्यपि क्रियैव तथा
पि विषयत्वस्यूतेः कृतिरेव विवक्षिता। तद्विषयत्वं च विधेयतयाबोध्यं॥ तेन फलेन व्यभिचार
स्त[illegible]योद्देश्यतयाकृतिविषयत्वात्। विधेयतयाकृतिविषयत्वं चैत्यवंदनादावपीत्यतः [illegible]शि
ष्टेति॥ शिष्टत्वं च फलसाधनतांशे भ्रांतिरहितत्वं न तु वेदप्रामाण्याभ्युपगंतृत्वं। तेन व्युक्रमेण
कृ[illegible]दृशौदौ निष्फलेन व्यभिचारः॥ शिष्टाचारविषयत्वं श्येनयागावप्यस्त्यतोऽविगीतेति॥ अ
विगीतत्वं च बलवदनिष्टाननुबंधित्वं। तेन श्येनयागादौ प्रवत्स्रूपयुक्तौ बलवदनिष्टाननुबं
धि[illegible]साधनत्वरूपसाध्याभावेपि न[illegible]ः॥ सिद्धे। अनुमिते। तत्र। मंगले॥ फलजिज्ञासायां। विशे
ष्ट[illegible]फलजिज्ञासायां॥ ननु कथं तर्हि गंगास्नानादीनामदृष्टार्थकतेत्यतः संभवतीति॥ तथा
त[illegible]दृष्टासंभवेनादृष्टकल्पने भावः॥ ननु तथापि विविस्वैन्यायात्स्व[illegible]र्ग एव फलं कल्प्यतामत आह॥
उ[illegible]स्थितत्वादिति॥ आरब्धे कर्मणि निर्विघ्नं समाप्यतामिति ग्रंथादौ प्रवृत्तपुरुषकामनाविषय
त्वे परिशेषानुमानेप्रवर्त्तमानपुरुषस्योपस्थितत्वादित्यर्थः॥ कल्प्यते। अनुमीयते। अनेनच
अजनकत्वं६ जितूर

व्यभि
चारः५

मंगलस्यसमाप्तिहेतुत्वेऽनुमानमेवप्रामाणं। ननुशिष्टाचारानुमितास्तुतिः। इदानीमा
तुरकेविशेषनिर्णयाभावेननतस्याअबोधकत्वादितिसूचितं॥ आपकत्वघटितकार
णताग्रहप्रतिबंधकाज्ञानविषयव्यतिरेकव्यभिचारमुद्धंति॥ इयंचेति मंगलस्यसमा र३
प्तिफलकत्वेचेत्यर्थः। नत्रापिनास्तिकादिग्रंथेपि। तत्र मंगलं। कल्प्यते। अनुमीयते। का
र्यरूपसमाप्त्येतिशेषः। ग्राह्यसंदेहपर्यवसन्नस्यएवोक्तव्यभिचारसंशयस्यकारण
तानुमितावप्रतिबंधकत्वेव्यभिचार[illegible]निर्णयस्याभावादितिभावः॥ नन्वेवंम
न्वयव्यभिचारज्ञानंकारणताग्रहविरोधिभवत्येवेत्याशंक्यान्वयव्यभिचारानिर
स्येति। [illegible]त्रचेति। तत्रकादंबर्यादौबलवत्तरत्वेवे[illegible]जाह। नन्वेवमपिकादंबर्यादौकु
तोनविघ्नध्वंसः। तत्राह। प्रचुरस्येति। प्रचुरस्येवमंगलस्येत्यर्थः॥
स१

१   रा १   ततत्र

बलवत्तरविघ्ननिवारणे। बलवत्त्वादिविघ्ननिवारणे। तेनु प्रचुरविघ्नध्वंसस्यापि परिग्रहः।
तथा च मंगलस्य विघ्नसमसं[illegible]ख्यमंगलत्वेन नाशकतया विघ्ननाश इति भावः। ननु तथा
पि कादंबर्यादौ विघ्नध्वंसो मा[illegible] जायमानोऽसमाप्तिः। परं जायतां मंगल[illegible]रूपहेतोः। सत्यादि
त्वात् क्याहा विघ्नध्वंसस्त्विति॥ तथा च स्वजन्यविघ्नध्वंससंबंधेन मंगलाभावान्न तत्र
समाप्तिरिति भावः। आहुरित्यस्वरसोऽस्यावनंतद्वीजं तु विघ्नध्वंसद्वारा मंगलस्य हेतुत्वे
न संभवति। नास्ति कग्रंथसमाप्तौ व्यभिचारा   दि ४
न [illegible] च स्वजनकविघ्नध्वं
सोऽसप्रयवच्छेदकतासंबंधेन समाप्तिं प्रति [illegible] हेतुत्वाद्वा जन्यो
स [illegible] जन्यविघ्नध्वंसावच्छेदकतासंबंधेन मंगलस्य हेतु[illegible]त्वात् स्वप्रतियोगिच मवणी
२

१०

नुकूलवृत्तिमत्वसंबंधेन समाप्तिं प्रति आश्रयतासंबंधेन मंगलस्य हेतुत्वाद् जन्मोत्तरीयमंगलक
ल्पनया न व्यभिचार इति वाच्यं। तथा सति जन्मोत्तरीयसमाप्तिमुद्दिश्य जन्मांतरे मंगल
करणापत्तेः। अतः स्वप्रतियोगिचरमवर्णविच्छेदकतासंबंधेन समाप्तिं प्रति स्वोत्पत्यवछेदक[illegible]जा
तीयतासंबंधेन मंगलहेतुत्वस्य वाच्यतया नास्तिकशरीरे व्यभिचारस्य दुर्वारत्वात्। न च
पुत्रकामाधिकरणविरोधः। सेष्ट कार्यितरासमवधानेन न ऐहिकपुत्राभावेप्यामुष्मिकपुत्ररू
पफलस्य तत्र सिद्धत्वादिति वाच्यं। तत्र पुत्रमात्रकामनाश्रवणात्। इष्टं तु विशिष्टशिष्टा
चारानुमितश्रुत्या ऐहिकसमाप्तेरेव मंगलफलत्वात्। न च स्वावच्छेदकावच्छिन्नप्रतियोगि का५
[illegible]कत्वस्वाव्यवहितोत्तरक्ष[illegible]णोत्पत्तिकत्वोभयसंबंधेन मंगलजन्यविघ्नध्वंसविशिष्टसमा शि४
प्तित्वस्य मंगलकार्यतावच्छेदकत्वान्न व्यभिचार इति वाच्यं। कारणस्य कार्यतावच्छे
दकत्वानभ्युपगमात्। अत एव काशीमरणान्मुक्तिरिति श्रुतेः तत्र पंचम्याः प्रयो
जकत्वोपवर्णनं ग्रंथकृतां संगच्छते। अन्यथा तत्रापि काशीमरणविशिष्टमुक्तिं

बर

पि४

२ प्रति काशीमरणे हेतुत्वस्य निर्दुष्टतया तत्त्वोपवर्णनम् [illegible] असंगतमेव स्यात् । अथ तमेव विदित्वा
तिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये [illegible] ति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति हेतुत्वं प्र[illegible]द नर
।सौ। तेन न च का[illegible]मरणस्य मुक्तिहेतुत्वेन संभवति क शीमरणजन्यमुक्तौ तत्त्वज्ञानस्य व्यभिचारादतः पादि
शी। कौ[illegible]मरणस्यानमुक्तिजनकत्वमेव तु तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमेवेति ग्रंथद्वयतात्पर्यं तत्त्वस
॥ मेच स्यात् प्रयोजकत्वोपवर्णनेन न तु कारणस्य का[illegible] यतावच्छेदकत्वेन तथोपवर्णनमिति चेदस्तु कारण प५
॥ स्य कार्यतावच्छेदकत्वम् [illegible] स्तु चेत् पूर्वोक्तरीत्या मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य का ध्वं५
श। ॥ र्यतावच्छेदकत्वेन नास्तिकेरीत्या व्यभिचारवारणं । एवं च पिभोगादिनाश्यविघ्नध्वंसपूर्वकस ध्वं४
॥ समाप्तौ कुमनसि पयतपूर्व [illegible] वर्तिताकेनं सैव मंगलस्वहीयस [illegible] प्रयु पप स्मा३
॥ ति नेमंगलस्या [illegible] न्यथासिद्धत्वं दुर्वारमेव न च व्यापारेण व्यापारिणोऽन्यथासिद्धिरिति
॥ ति वाच्यं परव्यापारिणः प्रामाण्यबोधितकारणतानिर्वाहाय [illegible] प्रस्यकारणत्वं कल्प्यते ॥ ॥६॥

ध्वं३ म८ मा१ २७

11

४=विशिष्टप्रतीतिः४

॥यथायागस्यस्वर्गहेतुतानिर्वाहार्थमपूर्वंतिनैवव्यापारेणाव्यापारितोनान्यथासिद्धिः॥अतएवकाशी
॥मरणस्यतत्त्वज्ञानेनमुक्तौअन्यथासिद्धत्वात्तत्र[illegible]योजकत्वपरतया श्रुतिसमर्थनंसंगच्छते॥प्र
॥इतरेचप्रतिबंधकाभावस्यकार्यमात्रेहेतुतायाः मंगलकारणतांविनापिक्लृप्तत्वात्यामंगलस्यान्य
ष्व४॥थासिद्धत्वंदु[illegible]रमेव॥फंचविघ्नध्वंसस्यवृत्तिं[illegible]यामक[illegible]त्वेनतत्संबंधावच्छिन्नप्रति नि४
च योगितायाअप्रसिद्धत्वेनहेतुत्वेनैस्यात्॥विघ्नध्वंससत्वद्वारत्वमिच्छतांप्रा
चांमतेपिविघ्नध्वंसस्यकार्यत्वावच्छेदकतयाचविघ्नोमाभूदितिकामनयाच
मंगलाचरणेण॥विघ्नध्वंसएवफलमितिवदतां॥चिंतामणिकृतांमततमा
कृतानव्यास्तिति॥ ॥विघ्नध्वंसएवसेवकारेणसमाप्तिर्व्यवच्छेद[illegible]॥फ दः
लंपवस्तुदूरेयंनुनुसमाप्तिस्त[illegible]ह्योकस्मि कौ[illegible]स्यादिसतआह॥

12

७ मैसे सिद्ध्यति ॥ बुद्धिर्ज्ञानं प्रतिभा तद्विशेषः स्फुटीरयाव ॥ प्रतिभादीत्यादिना विघ्नसंस
र्गाभावपरिमतः ॥ अनयैव रीत्या कारीरीस्थलेप्यवगन्तह विवृत्तिरेव फलं वृष्टिस्तु स्व
कारणादेवेति बोध्यं। एवं मंगलस्य विघ्नध्वंसं प्रतिजनकत्वे ॥ स्वतः सिद्धविघ्नविरह
४व वतेति। विघ्नात्यंताभावेन ॥ ननु निष्फले प्रवृत्तिरेव कथमत आह। विघ्नशंकयेति ॥
संशयनिश्चयसाधारणविघ्नज्ञानमेव प्रवर्तकमिति भावः ॥ तदाचरणात्। मंगलाच
रणात् ॥ ननु विघ्नसंशये मंगलाचरणमेवासिद्धमित्यत आह। तथैवेति ॥ शिष्टाचारा
२५ दिति ॥ विषयतासंबंधेन मंगलवत्तिविशेषः ॥ ननु निर्विघ्नपुरुषानुष्ठितमंगलस्थले
न्वयव्यभिचारेण विघ्नध्वंसप्रति मंगलस्य कारणता बाधिता तया च बाधितार्थबो
धकत्वाद्वेदस्याप्रामाण्यमिति मास्तु नः कारणता बोधकत्वमंगीकर्तुमेवं शंकां निरस्यति। ते भा३
न चेति ॥ तस्य निर्विघ्नपुरुषानुष्ठितमंगलस्य तद्बोधकेति। मंगलत्वविघ्नध्वंस[illegible]योः
कार्यकारणबोधकत्वस्य सति विघ्नेति। तथा चोपदर्शितस्थले प्रतियोगीरूपकारणाभावेन विघ्नध्वं ॥८॥
भाव१

श्रि२

५

रूपकार्यानुदयोपपत्तौ कारणताया अबाधितत्वेन नकारत्वाता बोधकवेदाप्रामाण्यमिति भावः।
अतएवं नाशं प्रति प्रतियोगिनः कारणत्वादेवा न तद्बोधकवेदाप्रामाण्यमिति। प्राये[illegible]त्त
स्य पापनाशकत्वबोधकवेदाप्रामाण्यमिति भावः। ननु मंगलं। विघ्नध्वंसे कारणं विना
कस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारात्।। विनायकस्तवस्य मंगलत्वेपि तदनुकूले
वेदाभिप्रात रूपस्य तत्पाठस्य मंगलत्वाभावात्। न च पाठकर्तासंबंधेन विनायक
स्तवस्यैव विघ्ननाशकः स च मंगलमेवेति न व्यभिचार इति वाच्यं सर्वे विघ्नाः
मंत्र्यांतीर्थस्यादिना तत्पाठस्यापि विघ्ननाशकत्वबोधनात् प्रायश्चित्तजन्यविघ्नध्वंसे
व्यभिचारात्त्वे इत्यत आह। मंगलेति। विनायकस्तवपाठादि इत्यादिना प्रायश्चित्तादि संग्रहः। तु३
तर यथाचारमंगलस्य स्वाव्यवहितोत्तरक्षणावृत्तिकत्वसंबंधेन मंगलविशिष्टविघ्नध्वंसत्वे विजातीय
विघ्नध्वंसत्वं वा कार्यतावच्छेदकं। एवं विनायकस्तवपाठस्योपदर्शितसंबंधेन विनायकस्तव

ठा३ स२

पाठविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकमिति न व्यभिचार इति भावः ॥ ननु विघ्नध्वंस
एव यदि मंगलस्य फलं तदा समाप्तिकामस्य मंगले प्रवृत्तिर्न स्यादतः समाप्तिसाधनविघ्नध्वंससाधनत्वान्मं
गले प्रवृत्तिर्वाच्या ॥ तच्च न संभवति स्वतःसिद्धविघ्नविरहस्थले व्यभिचारेण विघ्नध्वंसस्य समाप्ति
साधनत्वाभावादित्याशंकां निरस्यति क्वचिदिति ॥ प्रतिबध्नेति । सं[illegible]सर्गाभावस्य ॥ संसर्गाभावत्वेन
संसर्गाभावस्य । तथा च विघ्नसंसर्गाभावत्वेन हेतुत्वान्नह्वोक्तव्यभिचार इति भावः । अत्र च नन्तु विघ्ना
भावत्वेन हेतुता न तु विघ्नाभावकूटत्वेन विघ्नप्रागभाववादीनामेकत्र सत्वेन समाप्तिर्न स्यादिति बो
ध्यं ॥ यत्र मंगलं विनापि समाप्तिस्तत्र विघ्नध्वंसाभाववति समाप्तेर्दर्शनाद्व्यतिरेकव्यभिचारमाशंक्य निषे
धति दृष्टं चेति । दुरितध्वंसकल्पने तज्जन्मकृतमंगलकल्पने च गौरवादाह ॥ स्वतःसिद्धेति । यत्र च मं
गले सत्यपि न समाप्तिस्तत्र मंगलाद्विघ्नध्वंसो भवत्येव समाप्त्यभावस्तु विघ्नान्तरसत्वात्तत्र मंगलानन्तरो
त्पन्नविघ्नादित्यवधेयं । अथ समाप्तिविघ्नध्वंसयोराकाशात्मनिष्ठयोः कथं कार्यकारणभाव इति चेदुच्यते ।
स्वप्रतियोगिप्रयोजकत्वसंबंधेन चरमवर्णध्वंसरूपसमाप्तिप्रति विशेषणतासंबंधेन विघ्नसंसर्गाभाव

हे
त्वेन कैमुतिकमिति। वस्तुतस्तु आहुरित्यनेन सूचितामन्यथासिद्धिं प्रकटयति॥ क्व
चिद्धेतौ विघ्नात्यंताभावरूपेणैव प्रकारेण विघ्नध्वंसस्य तद्द्वारकमंगलस्य तच्च
व्यवच्छेद्यैः॥ समाप्तिसाधनं॥ समाप्त्यव्यवहितपूर्ववर्तितया निश्चितः। तथा च
लि३ तेनैव मंगलस्थलीयसमाप्तिनिर्वाहे मंगलस्य तज्जन्य। विघ्नध्वंसस्य चा
न्यथासिद्धिः ध्वंसप्रागभावयोरत्यंताभावेन विरोधे मानाभावात्॥ ध्वंसस्थले
प्यत्यंताभावसत्त्वादिति भावः। न त्वन्योन्याभावभिन्नाभावत्वेनैव लाघवात्॥
हेतुतावच्छिद्यत आह। प्रतिबंधकसंसर्गेति॥ प्रतिबंधकसत्त्वेपि संबंधांतरा
वच्छिन्नाभावस्य सत्त्वात्कार्यापत्तिवारणाय तत्तत्संसर्गावच्छिन्नप्रतियोगिता

त्रिध्वं

१२॥ ऽभावत्वेनैव हेतुत्वस्य वाच्यत्वे नैवं न ध्वंसस्य हेतुता। तस्य संसर्गावच्छिन्नत्वे माना
भावादिति भावः। दुर्लेऽपि ध्वंसः॥ उदित ध्वंससामग्रीप्रयुक्तः॥ स्वतःसिद्धो दुरितक्ष
ए२ णाभावप्रयुक्तः॥ तेन विघ्नध्वंसस्य सदसत्ताभावस्य वा मोऽसि हेतुता विचा
नै४ रस्याप्रकृतित्वात लघवरुच्छापने प्रकृतानुपयोगः॥ एवं प्रतिबंधकाभावकूट व४
स्य हेतुत्वे ऽतीतानागतव्यक्तिप्रागभावध्वंसयोर्युगपदवच्छेदानासंभ
वे बैरकुटाप्रसिद्धिः॥ [illegible]ः पूर्वोक्तरीत्या तत्तत्संसर्गावच्छिन्नप्रतियो
गिताकत्वस्य प्रतिबंधकाभावविशेषणत्वेन ध्वंसप्रागभावयोरसंग्रहश्चेति॥ १२॥
दुषणानि निरस्तानि॥ उक्तरीत्या प्रतिबंधकासंताभावे [illegible] वकार्यमात्रे हेतुत्वादिति॥
स्यैव

अत्र केचित्तु निर्विघ्नं परिसमाप्यतामिति कामनयेह विघ्नाभाव इति कामनया च
मंगलमाचरंतीति निर्विवादं तत्राद्या कामना फलविषयिणी। द्वितीया पायविषयिणी उ२
आद्यापि कामना सविशेषणो हीति न्यायेन विघ्नाभावस्यैव फलत्वबोधिकेति वर्द्धमानोक्तं। दू
क्यात् न्यायस्य सति विशेष्ये बाध एव प्रवृत्तेः। न चोपायविषयिणी कामना न दृष्टेति वाच्यं।
पुत्रो मे जायतां तेन लो यजेरत्यादौ यागसाधनीभूतपुत्रविषयिण्याः कामनायाः दृष्टत्वादा
द्यातु कामना नोपायविषयिणीति फलविषयिण्येवा न चोपायविषयिण्याद्ये कामना
यां तत्कथं समाप्तिरेव फलमिति वाच्यं। विघ्नसत्त्वादौ व्यभिचारेण कामना। विषय

।५०।

त्वस्य फले विनिगमकाभावाद्विघ्नाभावस्य फलतावच्छेदकत्वेन कामनाया अविषयत्वा-
च्च। न च वृत्तिनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वेन तत्संबंधावच्छिन्नायाः कारण-
ताया अप्रसिद्धिरिति वाच्यं। वृत्तिनियामकसंबंधस्यापि प्रतियोगितावच्छेदकत्वांगीकारात्। अत्र
त एव संयोगेन गगनाभादीनां केवलान्वयित्वमुपपद्यते नहि साकुठुस्तत्र पूर्वोक्तान्यथासिद्धेः रु ३५
द्वरतया मंगले समाप्तिकृत्वस्य बाधात्॥ मूले नूतनेत्यादि। नूतनो यो जलधरो मेघस्तस्य रुचि-
रिव रुचिर्दीप्तिर्यस्य तस्मै। एतेन यथा नूतनजलधरः शीघ्रं वृष्टिप्रदस्तथायमपि स्वाश्रितला-
षितफलप्रदातेति सूचितं। नमस्कार्यस्य भगवतः संतुष्टतां सूचयितुं विशेषणमाह। मूले गोपे-
ति। गोपानां वधूट्यो मुग्धस्त्रियस्तासां दुकूले वस्त्रं तस्य चोरायेत्यर्थः॥ तस्मा इति तच्छब्दः। सा-
मान्यतः सकलजनप्रसिद्धत्वसूचनाय। श्रीकृष्णायनमइत्यनेन भगवतो नमस्कारः प्राकारि ॥१०॥

19

कर्षापकर्षावधित्वरूपत्वमुक्तं तद्युक्तं। मानाभावात्। भगवतीत्याशंक्य नैयायिकाभिमतेश्वरसाधकानुमानसूचनाय तत्रैव संसारमहीरुहस्य बीजायेत्युक्तं। तत्र च संसारस्य महीरुहत्वनिषष्ठीतत्पुरुषपक्षमेवावलयितुं कर्मधारयसमासमाहामुक्तावल्यां संसार एवेति। बीजत्वे समावाकारणत्वं तच्चेश्वरे बाधितमत आहा निमित्तेति। ननु ईश्वरनमस्काररूपमंगलाचरणमयुक्तं ईश्वरे मानाभावात्। नहि तत्र प्रत्यक्षं प्रमाणं। अरूपित्वेन बाह्यप्रत्यक्षाविषयत्वात्। नापि मानसं परात्मनोपरेण मनसा प्रत्यक्षवारणायात्माप्रत्यक्षं प्रतिपरात्मवृत्तिविजातीयमनःसंयोगत्वेन हेतुत्वस्यावश्यकवाच्यत्वे ईश्वरे तस्याभावात्। न च द्यावाभूमी जनयन्देव एक इत्यादिश्रुतेरेव प्रमाणत्वं। श्रुतीनामीश्वरोच्चरितत्वेनैव प्रामाण्यादीश्वरसंदेहे श्रुतिप्रामाण्यस्यापि संदिग्धत्वादत आहाते तेनैति प्रामाणं अनुमानरूपं प्रमाणं। तथाहि क्षि संकुदिकमपिति। नन्वत्र किं पक्षतावच्छेदकं न तावत् क्षितित्वं। अं

यं३

या३

रा

॥११॥ कुरादेरपि क्षितित्वेनैव पक्षतोपादानवैयर्थ्यात्॥ किंच क्षितित्वे सामानाधिकरण्येन साध्यसि
द्धेरुद्देश्यत्वे दृष्टांते घटादावंशतः सिद्धेः साधनमवच्छेदकावच्छेदेन तथात्वे परमाणौ बाधः।
जन्यक्षितित्वस्य पक्षतावच्छेदकत्वे परमते जन्यपदव्यावर्त्याप्रसिद्धिः॥ नव्यमते जन्यक्षितेर्भावा ते३
त्वाज्जन्यत्वस्यैव तथात्वसंभवेन पक्षतावच्छेदककोटौ क्षितित्वस्य वैयर्थ्यं स्यात् न चेदं तदपि संभ टै
वति। पक्षतावच्छेदकहेत्वोरैक्यप्रसंगादिति चेन्नात्र स्वरूपसंबंधविशेषरूपकार्यत्वस्यैव पक्षता
वच्छेदकत्वात्। प्रागभावप्रतियोगित्वस्यैव कार्यत्वस्य हेतुत्वे न तयोरैक्याभावात् इति साध्यं
च तस्योपादानगोचरज्ञानचिकीर्षाकृतिजन्यत्वं। कार्यमात्रं प्रति कृतेरेवान्वयव्यतिरेकाभ्यां हे सेर
तुत्वेन तज्जनकत्वात्। चिकीर्षयोस्त्वन्यथासिद्धेर्नेन तत्त्रितयजन्यत्वरूपसाध्यस्य
तत्र बाधात्। दृष्टांतपक्षसाधारणस्य स्वत्वस्याभावेन तद्घटितस्योपादानगोचरज्ञानादिसा ॥११॥
स्वरूपसंबंधः१

ध्यस्यासंभवात्। कृतित्वापक्षयोपादानगोचरकृतित्वस्य गौरवेण कार्यजनकतानवच्छेदकत्वात्।
किंतु विशेष्यतासंबंधावच्छिन्नकृतित्वावच्छिन्नकारणतानिरूपितकार्यत्वं तेनादृष्टद्वारास्मदी
यकृतिजन्यत्वस्य पक्षे सत्वेपि नासिद्धसाधनं। यदि च कार्यमात्रे कृतित्वेनैवान्वयव्यतिरेकाभ्यां
ज्ञानत्वेनेच्छात्वेन च हेतुत्वं स्वीक्रियते तदा तादृशज्ञानजन्यत्वमिच्छाजन्यत्वं कृतिजन्यत्वं वा
साध्यमस्तु। यत्तु। कर्तृजन्यत्वमेव साध्यमिति तन्न। कार्यमात्रे कर्तृत्वेन जनकत्वे मानाभावा
ल्लाघवाच्च कृतित्वेनैव तत्र हेतुत्वात् तानुकार्यविशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानि
रूपितसमवायसंबंधावच्छिन्नजन्यताशालि प्रागभावप्रतियोगित्वादिसनुमानं फलि
तं तत्र तु ध्वंसे पक्षतावच्छेदकजन्यत्वाक्रांते विशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनक
तानिरूपितसमवायसंबंधावच्छिन्नजन्यत्वरूपसाध्यस्याभावाद्बाध इति चेन्न॥

22

सत्त्वविशिष्टजन्यत्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेदकत्वोपगमात् । न च हेत्वधिकरणे ध्वं-
से उक्तसाध्याभावेन व्यभिचार इति वाच्यं ॥ सत्त्वविशिष्टस्य हेतौ विशेषणत्वात् ॥ अत एव
रीसाध्यव्यभिचारवारणेऽपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन कार्यमात्रस्य कृतिजन्यत्वप्रमादो व्या-
हन्यतेति चेन्न ॥ तादृशप्रवादस्य निर्युक्तिकत्वेनाश्रद्धेयत्वात् । यद्वा जन्यत्वत्रैंमौ ध्वंससा-
धारणमेव पक्षतावच्छेदकं कृतिजन्यत्वमात्रं साध्यं । एवं च हेतावपि सत्त्ववैशिष्ट्यं नोपादेयं ।
प्रयोजनाभावात् ॥ एवं च ध्वंसेऽपीश्वरकृतिजन्यत्वस्य निराबाधतया कार्यमात्रे कृतिजन्य-
त्वप्रवादोऽप्युपपद्यत इति ॥ न च कृतिजन्यत्वमात्रस्य साध्यत्वेऽदृष्टद्वारा हविरादि[illegible]गोचरास्मदी-
यकृतिजन्यत्वमादाय सिद्धसाधनमिति वाच्यं । अदृष्टाद्वारकत्वेन कृतिजन्यताया वि-
शेषणीयत्वादिति दिक् । एतादृशानुमितौ लाघवज्ञानसहकारेण ज्ञानेच्छाकृतिषु निस ॥१२॥

त्वमेकत्वां[illegible]व भासत इति नित्यैकता सिद्धिः॥ अथ ईश्वरज्ञानादेः किं ह्यात्मैकत्वमनुमित्या विषयीक्रियते न
तावत्त्वं स्वात्मरूपं गुणगुणानंगीकारात्॥ न च नित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वरूपमेकत्वं त
द्विषय इति वाच्यं। ईदृशैकत्वस्य नित्यज्ञानानुमितेः प्रागनुपस्थितत्वेन तादृशानुमितौ भा[illegible]नासंभवादिति
चेदत्र केचित्॥ सामानाधिकरण्यसंबंधेनैव ज्ञानादावात्मत्वगतमेकत्वमनुमितौ भासते॥ यद्वा॥ द्वित्वसामा
नाधिकरण्यरूपमेकत्वं तद्विषयः॥ न च ग।जीवेश्वरगतद्वित्वसामानाधिकरण्यस्येश्वरज्ञानादेः सत्त्वाद्बाध इ
ति वाच्यं। दुःखवदवृत्तित्वेन द्वित्वस्य विशेषणीयत्वात्॥ न चैवमपि घटेश्वर[illegible]गतद्वित्वसामानाधिकर
ण्यस्य तत्र सत्त्वाद्बाध इति वाच्यं॥ आत्मानन्यवृत्तिभिन्नत्वेनापि द्वित्वस्य विशेषणीयत्वादित्याहुः॥
तन्न। ईश्वरज्ञानद्वयांगीकारेऽप्यतादृशैकत्वभा॥ न निर्वाहेणादेरप्यसिद्धेः॥ वस्तुतस्तु॥ स्वाधिकार
णावृत्तिस्वभिन्नज्ञानकत्वमेवैकत्वमेवमीश्वरेच्छाकृत्योरपि द्रष्टव्यं॥ एवं च तादृशज्ञानादि
सिद्धौ गुणत्वेन हेतुनाऽव्याप्तिस्तत्त्वे[illegible]साधनीये ज्ञानान्तरस्य बाधादीश्वरसिद्धिरिति दू
॥ ष्यं। अप्रयोजकत्वाच्च॥ अनुकूलतर्काभावादिति भावः॥

ऽद्दमुपलक्षणं। शरीराजन्यत्वहेतौ तु शरीररूपविशेषणस्यासिद्धिवारकस्यापि व्याप्ति
रोधोवारकत्वेन व्यर्थतया तद्विशेषणावच्छिन्ने व्याप्तिग्रहासंभवेन व्याप्यत्वासिद्धेरेवं चेत्स
पिष्टत्वं। नच व्यर्थविशेषणघटितस्याप्तिकोत्स्या निग्रहस्थानत्वेपि तज्ज्ञानदुष्टानस्य व्याप्ति
ज्ञानप्रतिबंधकत्वे मानाभावइति वाच्यं। तथापि गुरुधर्मस्यानवच्छेदकतया साध्यसंबंधि
तावच्छेदकरूपव्याप्तेस्तत्राभावेन व्याप्यत्वासिद्धेर्दुर्वारत्वादिति। तदुक्तमाचार्यैरेकामसि
द्धिं परिहृतो द्वितीयापत्तेरिति। कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवेति। न चान्वयव्यतिरेको
भ्यां घटत्वाद्यवच्छेदेनानंतकार्यकारणकल्पनावच्छिन्नप्रति कुलालादिकृतित्वादिना हेतु
त्वादेतादृशकार्यकारणभावे मानाभावइति वाच्यं। घटत्वपटत्वादिभेदेनानंतकार्यकारे तु २
णुरणकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वकल्पनस्यैवोचितत्वात्। यद्विशेष
योरिति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारणभावस्यावश्यकत्वाच्च। नच ता ॥१३॥

दृशन्ताचे। निष्प्रमाणादिति चेत्। कार्यत्वावच्छिन्नाभावेन तत्तद्रसभावकूटस्य प्रयो
जकत्वकल्पने गौरवात्। धुतित्वावच्छिन्नाभावस्यैकस्य प्रयोजकस्य लाघवादि
चं ३ ति। केचित्तु मास्तु कार्य[illegible] हेतोः कार्यत्वावच्छेदकं तथापि घटत्वावच्छिन्ने प्र
तिहेतुः कारणतया सगोप्याका। लीनं घटादिकं पक्षीकृत्य घटः। त्यादिहेतुना स घ ४
कर्तृत्वस्य साधने जीवानां बाधादीश्वरासिद्धिमाहुः। दी।धितिकृतस्तु। कार्य
त्वावच्छिन्नेप्रतिहेतेर्हेतुत्वाभावेपि घटत्वावच्छिन्ने प्रतिहेतेर्हेतुतया खंडघटो
त्पतेः पूर्वक्षणे तेरावस्यकतया तदा [illegible] श्रयत्वेनेश्वरसिद्धिमाहुः। नंन्वेवं रसाघ
टादिकुलालादिचेष्टयोरन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नेप्राति[illegible] चेष्टा। त्यादि
नाहेतुत्वादंकुरादौ तु सतेः पूर्वं चेष्टानुरोधेने[illegible]रस्य नियमतः शरीरमपि
२१

।१४॥

सिध्येदिति चेन्न। तादृशान्वयव्यतिरेकाभ्यां क्रियात्वेन हेतुत्वात् तत्र चेष्टात्वेन हेतुत्वे मा
नाभावात्। आचार्यमतानुयायिनस्तु अस्तु चेष्टात्वेन तत्र हेतुत्वं अस्तु च तदनु
रोधेनेश्वरस्यापि सशरीरत्वं तथापि नेश्वरस्यातिरिक्तशरीरसिद्धिः। परमाणू
नामेव तच्छरीरत्वोपगमात्। एवं चेश्वरकृतिजन्यचेष्टावद्भिः परमाणुरूपशरीरैरेव कार्यो १४
त्पत्तिः। परमाणुक्रियायां चेष्टात्वस्यापि वैजात्याङ्गीकाराच्छरीरलक्षणस्याव्यापि
त्वस्यापि वैशिष्ट्यान्न परमाणूनां शरीरत्वानुपपत्तिः। न च नानापरमाणूनां शरीरत्वे
कल्पने गौरवात् [illegible] लाघवेन तस्यातिरिक्तशरीरसिद्धिरिति वाच्यं। तच्छरीरस्य
महत्त्वोपगमस्य तस्य पाषाणादौ प्रवेशासंभवेन पाषाणान्तर्वर्तिभेकशरीरोत्पाद ॥१६॥

कत्वानुपप[illegible]त्तेः। अ एकस्य चंद्रस्य कार्योत्पादकत्वानुपपत्तेरित्याहुरित्यालं पल्ल
वैरिति। यत्तु पूर्वोक्तस्थापनानु[illegible]माने शरीरजन्यत्वमुपाधिः। तस्य घटादौ साध्यव्यापकत्वात्।
अंकुरादौ साधनाव्यापकत्वाच्चेन्न। अंकुरादौ सकर्तृकत्वरूपसाध्यसंदेहे नोपाधेः॥ सा
ध्यव्यापकत्वसंशयान्नोपाधित्वनिश्चय इति वाच्यं। तथापि संदिग्धोपाधित्वस्य दुर्वा
रत्वात्। अन्यथा सोपाधिसंदेहादिनो व्यभिचारसंदेहः पक्षीयसंदेह एव सच न प्रतिबंध
क इ[illegible]ति वाच्यं पक्षेतरसमयोर्व्यभिचारसंशयस्यापि प्रतिबंधकत्वादत एवानुकू
लतर्कविरहदशायां पक्षेतरत्वे संदिग्धोपाधिरित्युक्तिरभिधानं ग्रंथकृतां संगच्छत इ
ति। नन्वा कार्यत्वेन कृतित्वेन कार्यकारणभावरूपस्यानुकूलतर्कस्य सत्त्वेन कार्य

१५॥

त्वरूपा हेतोः साध्यव्याप्यत्वेन निश्चयेन साध्यव्याप्या व्यापकत्वेनोपाधेः सा
ध्यव्यापकत्वे निश्चयादिति। एवं चोक्तानुमानेनेश्वरसिद्धौ तदुच्चरितत्वेन वेदस्य प्रा
माण्यनिश्चयाद्वेदोपीश्वरे प्रमाणमित्याह। द्यावाभूमिति। इत्यादिना ईश्वरमुपा
सीत यः सर्वज्ञः सर्वविषयस्य ज्ञानमयं तपः सोकामयत इत्यादिना परिग्रहः। कार्यपक्षका
त्वमानं चोपलक्षणं। सर्गाद्यकालीनद्व्यणुकप्रयोजकं कर्म प्रयत्नजन्यं कर्मत्वात्। गुरुत्व
वतां पतनाभावः। पतनप्रतिबन्धप्रयत्नयुक्तः। धृतिस्यात्। ब्रह्मांडनाशः प्रयत्नजन्यः।
नाशत्वात्। घटादिव्यवहारः। स्वतंत्रपुरुषप्रयोज्यः। व्यवहारत्वात्। आधुनिककल्पि
तलिप्यादिवत्। वेदजन्या प्रमा। वक्तृयथार्थज्ञानजन्या। शब्दप्रमात्वात्। वेदः। अ
संसारिपुरुषप्रणीतः। वेदत्वात्। वेदः। पौरुषेयः। वाक्यत्वात्। द्व्यणुकपरि ।।१५॥

रो

माणजनिका संख्या। अपेक्षाबुद्धिजन्या। एकत्वान्यसंख्यात्वात्। इत्यनुमानं तरा
ण्यपि साक्षात्परंपरया वा ईश्वरसाधकानि बोध्यानीति। तदुक्तं। कार्यायोजनधृत्या
देः पदात्प्रत्ययतः श्रुतेः वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्यय इति। १।।
आयोजनं कर्म। पद्यते गम्यतेऽनेन पदं व्यवहार इति संक्षेपः।। मूले शिष्याबु
ध्यानाय प्रतिजानीते।। द्रव्यं गुणा इति। निरूप्यत इति शेषः।। संख्यायोगापेक्षया कर्म
णोतिरिक्तं चेन्नास्तीति भूषणमतं निराकर्तुं तथैव सत्त्वं।। यथा गुणः पृथक्पदा
र्थस्तथा कर्मापीत्यर्थः।। आभावोऽधिकरणात्मक एवेति प्राभाकरमतं दूष
यितुं पुनस्तद्वचनं युक्तिश्चाग्ने वक्ष्यते। यद्यपि विभागवाक्यस्य न्यूनाधिकसं
ख्याव्यवच्छेदकत्वेनैव संसर्गसंख्यात[illegible]भालस्तथापि स्पष्टान तणं
स्पष्टार्थं।। ननु चैव पदार्थाः कुतो नोक्ता इत्यत आह।।

30

।६॥

धै २

कीर्तिता इति ॥ तथा चैतेभ्योन्ये पदार्थाः न संत्येव [illegible] कणादप्रभृतिभिरनुक्तत्वादिति भावः ॥ न
न्वितरेषु ग्रंथेषु षड्भावपदार्थाः सप्तमस्त्वभाव इति निरूपितं । [illegible]वात्र कुतो न निरूपितमित्या निर
शं स्यात् ॥ मुक्तावल्यां सप्तमस्येति ॥ अत्र समवायैकार्थसमवायान्यतरसंबंधेन सत्ताव
त्वं भावत्वं तदभावोऽभावत्वमिति ॥ प्राप्तं । अर्थात् प्राप्तं । तेन प्राप्तत्वेन । पृथगुपन्यास इति ॥ भावत्वेनो
पन्यास[illegible]स्त्वर्थः ॥ तेषामिति शेषः । नन्वन्ये पदार्थाः कथं न संति न्यायग्रंथे षोडशपदार्थनिरूपणा
दित्याशंक्य नैयायिकानामपि मते सप्तपदार्था इ[illegible]स विरुद्धं । षोडशपदार्थानां सप्तपदार्थे
ष्वेवांतर्भूतत्वादित्याह ॥ एते चेति । उक्तार्थभाष्यसंमतिमाह । प्रतिपादितं चेति । एवमेवेति ॥ द्र
व्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तैव पदार्थाः ॥ षोडशानामत्रैवांतर्भावा
दिति प्रतिपा[illegible]दितमित्यर्थः ॥ कथमंतर्भाव इति चेदित्थं ॥ प्रमाणस्येंद्रियादेर्द्रव्ये । व्याप्ति
ज्ञानादेर्गुणे ॥ प्रमेयस्यात्मशरीरेंद्रियस्वरूपस्य द्रव्ये । अर्थस्य गंधरूपस्पर्शशब्द

॥१६॥

स्वरूपस्य गुणो। बुद्धेर्गुणो। मनसो द्रव्ये। प्रवृत्तेर्गुणो। दोषाणां मिथ्याद्वे[illegible]प
मिथ्याज्ञानस्वरूपाणां रागद्वेषमोहपदप्रतिपाद्यानां गुणो। प्रेत्येम[illegible]
त्वाभावो जननमितिमृत्युससामरणोत्तरजन्मत्वं प्रे[illegible]सभावपद्ध
प्रवृत्तिनिमित्तकं। चरम[illegible]प्राणशरीरसंयोगध्वंसो मरणं।
आद्यः। शरीरप्राणसंयोगो जन्म। तथा च मरणोत्तरता दृश
संयोगरूपस्यणो सुखदुः[illegible]खसंवेदनरूपस्य मुख्यफलस्य
गुणो। गौणमुख्यमसाधारणजन्यमात्रस्वरूपफलस्यापि द्रव्यादिषु।

॥१७॥ पीडालक्षणस्य दुःखस्य गुणेंतर्भावः। अपवर्गस्त्वात्यंतिकी दुः
खनिवृत्तिः दुःखानि शरीरं षडिंद्रियाणि षड्विषयाः षड्बुद्धयः सु
खं दुःखं चेत्येकविंशतिः। तत्र दुःखत्वजातिशून्ये शरीरादौ दुः
खसंबंधित्वप्रयोगेणं दुःखत्वं स्वर्गादिसुखस्यापि तन्नाशशोनै
न दुःखसंबंधित्वमप्याहतमेवान चैकविंशति दुःखानां तर्ग
तयोर्मनःश्रवणयोर्नित्यत्वात्कथं तन्नाश इति वाच्यं यद्रू
प विशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया दुःखत्वं
तद्रूपकर्णशष्कुल्याः नाशेन तद्विशिष्टश्रवणेंद्रियरूपदुः ॥१७

खनाशात्। एवमात्मसंयोगरूपआपारविशिष्टस्यैवात्म
नसोज्ञानद्वारादुःखरूपतयाआपारनाशेनतद्विशिष्ट
मनोरूपदुःखनाशसंभवादिति। दुःखनिवृत्तावात्यंतिकं
त्वंस्वसमानाधिकरणदुःखासमानकालीनत्वं। नन्वेतांश दृ
दुःखध्वंसस्य मुक्तित्वे कथं तत्त्वज्ञानसाध्यतानस्येति चेदि
त्थं। तत्त्वज्ञानेन मिथ्याज्ञानवासनानाशः। वासनानाशेच
दोषस्य वासनाविशिष्टरागादेरभावः। विशेषणाभावे वि
शिष्टाभावात्। तादृशरागरूपदोषस्याभावेच प्रवृत्तेर्धर्माधर्मरूपायाअभावोनुत्पत्तिः।।

।।१८।

।।तदनु सा देहप्रारब्धकर्माभावे न देहान्यदेहसंबंधरूपजन्माभावः।।भोगेन तत्त्वज्ञानाभ्यां प्रारब्ध
।।तदभिन्नकर्मनिवृत्तिरिति। जन्माभावे दुःखानुत्पादः।।तथा च स्वसमानाधिकरणदुः
।।खासमानकालीनत्वरूपविशेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वान्मुक्तेस्तत्त्वज्ञानसा
।।ध्यत्वं। तथा च सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनं
।।तराभावादपवर्ग इति।।अस्यार्थः।।पठितेषु जन्मादिमध्ये उत्तरोत्तराणामपाये
।।तदनंतराभावादव्यवहितपूर्वाभावात्। तथा च तत्त्वज्ञानेन मिथ्याज्ञानस्य
।।नाशः। तेन दोषाणां नाशः।। तेन प्रवृत्तेरनुत्पादः। तेन जन्मानुत्पादः।। तेन दुःखा
।।नुत्पाद इति पूर्वोक्त एवार्थः पर्यवसितः।। एकविंशतिदुःखनाशस्तु स्व ।।१८।।
।।कारणसाध्यो न तत्र तत्त्वज्ञानस्य प्रयोजकत्वमिति वदंति।। नमोस्तु योग्यविभु

विशेषगुणनाशं प्रति स्वोत्तरवर्त्तिगुणानां कारणत्वात् स्वोत्तरोत्पन्नगुणेनैव दुःखध्वंसरूपमुक्ति-
संभवेन न तत्त्वज्ञानापेक्षेति। दुःखपदं दुःखसाधनदुरितपरतया व्याख्येयं। दुरितस्य
चायोग्यगुणत्वान्न स्वोत्तरवर्त्तिगुणनाश्यत्वेति तन्नाशमुक्तेस्तत्त्वज्ञानसाध्यत्वमेवे-
त्याहुः॥ तथा चैतादृशाभावस्य [illegible]त्वे। संशयस्य गुणो। साध्यतया इच्छाविषयरूपस्य
प्रयोजनस्य यथा यथेक्ष्वादिषु। साध्यसाधनोभयवत्तानिश्चयविषयरूपस्य दृ-
ष्टान्तस्य यथा यथेक्ष्वादिषु। तत्तघास्यासिद्धार्थरूपस्य सिद्धान्तस्य यथेक्ष्वादिषु। शब्दस्य रू-
पप्रतिज्ञाद्यन्यतम[illegible]रूपाणामवयवानां गुणो। व्याप्यारोपेण व्यापकारोपस्य तर्कस्य गु-
रू णो। निर्णयस्य गुणो। तत्त्वबुभुत्सोः कथा[illegible]पवादस्य गुणो। विजिगीषुकथारूपस्य जल्पस्य
गुणो। स्वपक्षस्थापनहीनकथारूपवितण्डायाः गुणो। अनुमितितत्करणज्ञानान्यप्रतिबंधकज्ञा

॥१९॥ नवि[illegible]यरूपाणां हेत्वाभासानां यथायथं अस्मादिषु। अभिप्रायांतरेण प्रयुक्तस्य श[illegible]ब्दस्या
र्थांतरं संपरिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणे। असदुत्तररूपजातेर्गुणे। पराजयहेतुस्वरू
पनिग्रहस्थानानां यथायथं द्रव्यादिष्वंतर्भावः। निग्रहस्थानानि। प्रतिज्ञाहानिः १ प्रति
ज्ञांतरं २ प्रतिज्ञाविरोधः ३ प्रतिज्ञासंन्यासः ४ हेत्वंतरं ५ अर्थांतरं ६ निरर्थकं ७ अवि
ज्ञातार्थं ८ अपार्थकं ९ अप्राप्तकालं १० न्यूनं ११ अधिकं १२ पुनरुक्तं १३ अननुभाषणं १४
अज्ञानं १५ अप्रतिभा १६ विक्षेपः १७ मतानुज्ञा १८ पर्यनुयोज्यापेक्षणं १९ निरनुयोज्यानुयो
गः २० अपसिद्धांतः २१ हेत्वाभासाश्च २२ अत्र चैरानुक्तसंमुच्चयार्थे तेन दृष्टांते साधनवैकल्य। काद्य
दीनां परिग्रहः। नच विशिष्य प्रतिज्ञातस्य पक्षादेः परित्यागरूपप्रतिज्ञाहानेरभावोपरोक्तनु
दोषोद्दिधीर्षया पूर्वोनु तद्विरोषणाविशिष्टतया प्रतिज्ञातार्थक[illegible]थनरूपस्य प्रतिज्ञांतरस्य गुणे २
स्वोक्तसाध्यादिविरुद्धे हे[illegible]त्वादिकथनरूपप्रतिज्ञाविरोधस्य गुणे ३ स्वोक्तसा ॥१९

ध्यादेः परेण दूषणे कृते तत्साध्यापलापरूपप्रतिज्ञासन्यासस्य गुणे। परोक्तदूषणो
द्धिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टकथनरूपहे
त्वंतरस्य गुणे। प्रकृतानाकांक्षिताभिधानरूपार्थान्तरस्य गुणे। अवाचकपदप्रयोगरू
पस्य निरर्थकस्य गुणे। परिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाचक। वाक्यप्र
योगरूपाविज्ञातार्थस्य गुणे। अभिमतवाक्यार्थबोधानुकूलाकांक्षाशून्यपदप्र रूप
स्यापार्थकस्य गुणे। समयबंधविषयीकृतकथाक्रमेणाभिधानरूपस्याप्राप्तकालस्य गुणे। प
किंचिदवयवस्यावयवाभिधानरूपस्य न्यूनस्य गुणे। अधिको [illegible] हेत्वाद्यभिधानरूपस्या
धिकस्य गुणे। पुनरभिधानरूपस्य पुनरुक्तस्य गुणे। परिषदा त्रिरभिहितस्या [illegible] प्रत्युच्चारणरूपस्या
ननुभाषणस्यांपा [illegible] वे।। परिषदा विज्ञातार्थस्य वादित्रिरभिहि

38

१०रि नि

तस्याप्यविज्ञानरूपस्याज्ञानस्याभावो। उत्तरार्हे परोक्तं बुध्वापि उत्तरस्याप्रतिपत्तिरूपायाअप्रतिभा
॥२०॥ २ याअभावो। अभिमवे कालांतरकार्य [illegible] व्यासंगमुद्भाव्य कथाविच्छेदरूपस्य विक्षेपस्याभावो। [illegible]
स्वपक्षे दोष[illegible]मनुद्धृत्य परपक्षे दोषाभिधानरूपमतानुज्ञायाः गुणो। निग्रहस्थानं प्राप्तवतो
निग्रहस्थानाननुद्भावनरूपस्य पर्यनुयोज्योपेक्षण[illegible]स्याभावो। अनिग्रहस्थाने निग्रहस्था[illegible] —स्थ५
॥[illegible]नाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणो। कथायां स्वीकृतसिद्धांतप्रच्यवरूपस्यापसिद्धांतस्याभा
॥वो। हेत्वाभासानां पूर्वोक्तलक्षणानां इत्यादि एवं तन्त्रीभवरति॥ [illegible] भाष्यस्यार्थस्य सारांशं गंगेशोपाध्या
नांसंमतिमात्र॥ अत एवेति॥ मण्यादिसमवधाने सति वह्निना दाहो प्रतिवारणाय मण्यादेः[illegible]का
रणविघटकत्वरूपा प्रतिबंधकता वाच्या॥ सा च वह्निनिष्ठदाहानुकूलशक्तिरूपकारणविघट
नर केर्यैव निर्वहतीति॥ मण्यादिप्रतिबंधकतान्यथानुपपत्त्या सिद्धायाः शक्तेः षड्भावेष्वनंतर्भूतत्वा
दतिरिक्तमिति॥ पदार्थाः सप्त कीर्तिता इति मूलमयुक्तमित्यभिप्रायेण प्राभाकरः शक्तौ॥ ॥२०॥
सं१ ता१

नन्विति॥ अतिरिक्तेति॥ क्लृप्तपदार्थातिरिक्तेत्यर्थः॥ अतिरिक्तपदार्थतामेव व्यवस्थापयति॥ तथाहीत्या
दिना॥ मण्यादीत्यादिना मंत्रौषध्यादिपरिग्रहः॥ सर्वेमेलितेति॥ समीपवर्तिना॥ वह्निरूपकारणाभा
वादेव न दाह इति न मण्यादेः प्रतिबंधकत्वमतः समवहितेन वह्निना॥ दाहो रूपांतरोत्पत्तिः पूर्व
रूपपरावृत्तिर्वा॥ मण्याद्यतिरिक्तप्रतिबध्यत्वं खंडयति॥ तदन्येति॥ मणिसमवधानशून्येनेत्यर्थः॥
ननु वह्नौ यदि दाहानुकूला शक्तिस्तदा मण्यादिसत्त्वे कुतो न दाहस्तत्राह॥ तन्नेति॥ पूर्वो
क्तयु[illegible]क्त्या शक्तिसिद्धावित्यर्थः॥ दाहानुकूलेति॥ अत्र चानुकूलत्वं कारणतावच्छेदकसा
तेन धारणं शक्तेः कारणतावच्छेदकत्वेन क्षतिः॥ नास्येत इति कल्प्यत इत्यग्रेतनेनान्वयः॥ तथा च
वह्निनिष्ठशक्तित्वावच्छिन्नं प्रति मणित्वेन नाशकत्वस्वीकारेण मण्यादिसत्त्वदशायां शक्तेरभा
वादेव न दाह इति भावः॥ ननु मण्यादेर्यदि शक्तिनाशकत्वं तदा सत्युत्तेजकविशिष्टे मण्यादौ

२१॥ अपसारिते बाधदाहानापत्तिरित्यत आह ॥ उत्तेकैजेनेति ॥ मण्याद्यपसारणेन चेत्यत्र चकारो वाका-
रार्थे न च दाहं प्रति मण्यभावत्वेन हेतुत्वकल्पनान्मणिसमवधानकाले दाहापत्तिरिति वाच्यं।
मण्यभावत्वेन रूपेण स्वतंत्रहेतुताकल्पने गौरवात् ॥ विलक्षणशक्तिमत्त्वेन वन्हेः कारणत्व-
कल्पनस्यैवौचित्यादि समभिमानात् ॥ नन्वेवं शक्तिसिद्धावपि तस्या अतिरिक्तत्वासिद्धिरिति चे-
न्न ॥ उक्तपदार्थेष्वनंतर्भूतत्वात् ॥ तथाहि ॥ न तावत् द्रव्यात्मिका शक्तिः गुणादिवृत्तित्वात् ॥ अत एव
वन्न गुणात्मिका कर्मात्मिका वा। न च सामान्याद्यन्यतमरूपा उत्पत्तिमत्त्वे सति विनाशित्वादि-
ति। एवमतिरिक्तां शक्तिं प्रसाध्याधुना सादृश्यस्यापि उक्तपदार्थता व्यवस्थापयति। एवमित्यादि॥
ना ॥ अतिरिक्तमिति ॥ उक्तसप्तपदार्थातिरिक्तमित्यर्थः ॥ षड्भावानंतर्भूतत्वे सति अभावा-
नंतर्भूतत्वादिति हेतुः पूरणीया ॥ तत्र सप्तता सिद्धिं निरस्यति ॥ तत्रेति ॥ तत् सादृश्यं इति हेतौ ॥ सा-
समान्येपीति ॥ सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादित्यर्थः ॥ तेन सामान्यत्वेन व्यभिचारः ॥

॥२१॥

41

व्यतिरेकित्वे सतीति विशेषणात् न प्रमेयत्वादौ व्यभिचारः॥ भावत्वे च इत्यादि षट्कान्यतमत्वरूपते
नुमति साध्यस्य सत्त्वान्न व्यभिचारः॥ तथेति॥ यदि सा दृश्यं इत्यादावंतर्भूतं तदा बौद्धेदेः सामान्यो
वृत्तित्वेन यथा गोत्वं नित्यं तथा भावत्वमित्यबाधितप्रतीतिर्न स्यादित्यर्थः॥ अभावेंतर्भावमाशं
क्य निराचष्टे॥ नापीति॥ न्यघपातिरिक्ताभावमनंगीकुर्वतः प्राभाकरस्य मते, भावेंतर्भावश्चित
न संभवति तथापि परमतमभ्युपेत्येदं निराकृतमिति भावः। सत्त्वेनेति॥ भावत्वेन प्र
तीयमानत्वात्॥ मणिसमवधानकालीनवन्हिदाहवारणाय प्राभाकरेण साधितां शक्तिं दूष
यति॥ मण्याद्यभावेति॥ अतिरिक्तशक्तिकल्पनां पूर्वोक्त्या नास्य नाकेशो भावकल्पनां चाप
क्ष्य लाघवाद्दाहत्वावच्छिन्नं प्रति मण्यभावत्वादिनैव हेतुता कल्पनमुचितमिति भावः॥
दाहादिकमित्यादिपदेन वन्हिसंयोगः॥ मणिसत्त्वे वन्हेरप्यनुत्पत्तेः॥ तथा च मणिरूपप्रतिबंध
कसत्त्वान्न दाहो वन्हौ इति भावः॥ ननु यदा कदाचित् मण्यभावविशिष्टवन्हेर्दाहापत्तिः।
कारणतावच्छेदकावच्छिन्नकारणसत्त्वस्यैव कार्योत्पत्तिनियामकत्वात्॥ मण्यभावविशि

॥२२॥ ष वह्नित्वं वह्निविशिष्टमण्यभावत्वं वा कारणतावच्छेदकमित्यत्र विशेषणविशेष्यभावे विनिगमनाविरहे
ण गुरुभूतकार्यकारणभावद्वयापत्तिश्चे सत आह॥ मण्याद्यभावादेरिति। तथा च प्रतिबंधक
त्वं कोनेयानुकूलधर्मविघटकत्वं। बाधज्ञानस्यानुमितिप्रतिबंधकत्वाभावापत्तेः। कारणीभू
ताभावप्रतियोगित्वं। तत्र मण्यभावस्य हेतुत्वे एवोपपद्यते॥ न त्वतिरिक्तशक्तिसत्त्वे इति भावः॥
ननु प्रतिबंधकस्येदृशत्वे कारणीभूतवह्निरूपाभावप्रतियोगिवन्ह्यभावेऽतिव्याप्तिः॥ स्वप्रागभा
वप्रतियोगिनि घटादौ चेति चेन्न। तादात्म्यातिरिक्तसंबंधावच्छिन्ना या कारणता तदाश्रयी
भूतो यो भावभिन्नोऽत्यंताभावस्तत्प्रतियोगित्वस्य विवक्षितत्वात्॥ कारणताविशेषोपादाना
च्चस्यात्यंताभावमप्रसक्तेस्तस्य प्रतिबंधकत्वापत्तिपरास्ता॥ विषयस्य तादात्म्यसंबंधेनैव प्रस
क्तेर्हेतुत्वात्॥ ननु वह्निमण्यभावयोर्द्वयोर्हेतुतापक्षयाऽतिरिक्तशक्तेरेकस्या एव हेतुता युक्ता॥
लाघवादित्यत आह। अनेनैवेति॥ दाहादिकं प्रति मण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः॥ सा
मंजस्ये। मणिसमवधानदशायां दाहवारणे [illegible] प्रागभावे मानाभावादात्॥ ध्वंसेति। इदमुप ॥२२

णं

लक्षं प्रतियोगिध्वंसयोः शक्तिनाशमण्योः शक्तिमण्यपसारयोश्च कार्यकारणभावकल्पनापि स्यादि-
त्यपि बोध्यं॥ उत्तेजकाभावेति। तथा च केवलं मणिर्न प्रतिबंधकः किंतु उत्तेजकाभावविशिष्टस्तदभाव-
श्चोत्तेजकसमवधानकालेऽपि तिष्ठतीति न व्यभिचार इति भावः। अथ मण्यादिस्थलीयदाहं प्रति
उत्तेजकस्यैव हेतुतास्त्विति चेन्न। तस्याननुगतत्वात्तावदभावकूटविशिष्टमण्यभावस्याननु-
गतत्वात्। अत्रेदं बोध्यं॥ अभावीयविशेषणतासंबंधेन दाहत्वावच्छिन्नप्रतिद्वंद्वितादैशि-
क विशेषणतान्यसंबंधावच्छिन्नप्रतियोगिताकानां तत्तदुत्तेजकाभावानां सामानाधि-
करण्यरूपं यद्दैशिकं तदवच्छिन्नस्य मण्यादेर्दैशिकविशेषणतासंबंधा वच्छिन्नप्रतियो-
गिताकाभावस्याभावीयविशेषणतासंबंधेन हेतुत्वमिति॥ तेन संयोगसंबंधावच्छिन्न-
प्रतियोगिताकमण्यभावस्य न संयुक्तेऽपि सत्त्वान्न दाहापत्तिः॥ ननु अनुमानमेव शक्तौ प्र-
माणं। तथा हि॥ वह्निः दाहानुकूलातींद्रियधर्मसमवायी॥ दाहजनकत्वादात्मव-
दिति॥ वह्नि घणुकैकत्वमादाय भर्जनकपालस्थवह्निनिष्ठानुद्भूतरूपमादाय

२३॥ वाक्तिदुसाधनवारणाय साध्ये दाहानुकूलेति। वह्निद्व्यणुकेंधनसंयोगमादायाऽस्पंदास्सं
योगमादाय वात त्कारणत्वादिष्वेति॥ वह्निनिष्ठोस्स्पर्शमादाय तत्कारणाया। तींद्रिये
तीतिचेन्न। विपक्षबाधकतर्कविरहेणास्यानुमानस्याप्रयोजकत्वात्॥ केचित्तु। वह्निप्रति
तृणफूत्कारसंयोगादीनां तृणफूत्कारसंयोगत्वादिरूपेण कारणतायां व्यभिचारेणा
सम्भवादेतिरिक्तशक्तिसिद्धिः। नचैत्तृणफूत्कारयोररणिनिर्मथनयोर्मणितरणिकि
रणयोश्च संबंधस्य जन्यतावच्छेदकं वह्निवृत्तिवैजात्यत्रयं कल्प्यमिति न व्यभिचार इति वाच्यं॥
जैतेन्यतावच्छेदकवैजात्यत्रयंकल्पनामपेक्ष्य तत्तत्संबंधानामेकशक्तिमत्त्वेन कारणत्व
कल्पनाएयोवललघुत्वेनन्यायत्वादिसातु सत्त्वा। तत्तत्संबंधसाधारणैकजातेरेवास्तु
पगमात्॥ न च योग्यवृत्तिजाते योग्यत्वापत्तिरिति वाच्यं॥ दोषविशेषेण शक्ते
॥२३॥

रिवायोग्यसकल्पनात्॥ न च नोदनात्वादिना संकरः॥ तस्यादोषत्वात्॥ अन्यतमत्वेन कारणता संभ
वाच्च॥ न चान्यतमत्वघटकभेदानां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणतावच्छेद
कभेदाकारणतावात्वं स्मिति वाच्यं। कारणतावच्छेदकानां समनियतानां भेदानामैक्येन कारणताव
च्छेदकैक्यसंभवात्। न च भेदानां स्वरूपतोवच्छेदकत्वाभावेन तृणफूत्कारसंयोगभेदविशिष्ट
रणिनिर्मथनसंबंधभेदविशिष्टमणितरणिकिरणसंबंधभेदावच्छिन्नप्रतियोगिताकभेद
त्वादिनाऽवच्छेदकत्वं वक्तव्यं। तथा चावच्छेदकतावच्छेदकभेदावच्छेदकताभेदस्तद्भे[illegible] च कारणता दे
ताभेद इति वाच्यं। स्वरूपसंबन्धरूपाया अतिरिक्ताया वा कारणताया अवच्छेदकताभेदप्यभेदादिसत्त्व
त्वविस्तरः। परे तु तृणादिसंबंधकालीनवायुसंयोगादीनामेव शक्तिमत्त्वेन हेतुतामादाय विनिगम
नाविरहात् न शक्तिसिद्धिमाहुः। शंकितं सादृश्यमप्यतिरिक्तः पदार्थ इति तदपि निराकरोति। सादृ
श्यमपीति॥ तद्भिन्नत्वे सतीति॥ इदं च सादृश्यनिरूपकेऽतिव्याप्तिवारणाय। अनुयोगितासंबंध
विवक्षणेन तु नेदंयमेव॥ न द्रुतभूयो [illegible] धर्मवत्त्वमिति। तत्रासाधारण्यं न विद्यमानाये

46

२१

२४॥ भूयांसो धर्मास्तद्वत्त्वमित्यर्थः। नन्विदं गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामराव
णयोरिवेत्यादावव्याप्तमिति चेन्न। तद्वृत्तिधर्ममात्रस्य तत्रविवक्षितत्वाद्युगभेदविवक्षया भेदसत्त्वा
द्वा। अत एव युगभेदविवक्षायामिहोपमालंकारोऽन्यदानन्वयालंकार इत्युक्तमालंकारिकैः। सादृ
श्यघटकधर्मश्च क्वचिज्जातिरूपो यथा घटसदृशः पट इत्यादौ। क्वचिदुपाधिरूपो यथा गोतंतथा
त्वमपीत्यादौ। यथा वा चन्द्रसदृशं मुखमित्यादावाल्हादकत्वादि अतिरिक्तकल्पने गौरवादिति॥ नन्वा
स्तु। सादृश्यमतिरिक्तमेव। न चातिरिक्ते पदार्थविभागव्याघात इति वाच्यं। तस्य सा[illegible]क्षामरं परपाश
तत्त्वज्ञानोपयोगिपदार्थमात्रनिरूपकत्वपरत्वात्॥ एवमधिकरणसमपि। तस्य संयोगादिसरूपत्वे
वदरकुंडे [illegible] संयोगस्याविशिष्टत्वेन कुंडे वदरमितिवद्वदरे कुंडमित्यपि प्रयोगः स्यात्॥ एवं प्रतियोगि
त्वमपीत्याहुः॥ सादृश्यलक्षणं लक्ष्ये योजयति॥ यथेति। स्त्रियां क्तिन्निति सूत्रेविहितक्तिन्प्रत्ययां
न्तक्षितिरि[illegible]त्यस्य क्षयवाचकेसाक्षितिपदस्य प्रकृतोपयोगिनमर्थमाह। क्षितिः प[illegible]पि पृथ्वी ॥२४॥

47

अपशब्दस्यअपत्नत्त जिति आदिपाणिनीयसूत्रे शब्दपरत्वात् । आपोजल्मानीति । मलापस्यापि तेजः शब्दवा
चकत्वात् प्रकृते तेजः पदार्थं दर्शयति । वन्हिरिति । वा । स्यादिरित्यर्थः । देवविशेषस्यापि मरुच्छब्दवाच्यत्वा
त्प्रकृतोपयोगिनमर्थमाह । मरुद्वायुरिति । व्योमशब्दस्य वेदब्रह्मणि प्रयोगादाह । व्योमाकाशेति ।
अन्तकस्यापि कालशब्दवा च्यत्वात्प्रकृतोपयोगिनमर्थमाह । कालः समय इति ॥ देहविशिष्टार्थ
केऽनंतदेहिशरीरा [illegible] देहावयवानामुपस्थितेराह । देही आत्मेति । अथेश्वरस्य देहीनां मध्ये ऽ
नंतर्भावात्कथं द्रव्यत्वमिति चेन्न । व्रजाः । भूतावेशन्यायेनेश्व[illegible]रस्य शरीरमिष्टं ते । संसार्यदृष्टवशा
च्छरीरमिसन्ध्ये ॥ इनेपनास्वरसादात्मेति । पृथिव्यप्तेजोवा[illegible]य्वात्मान इति पंचैव द्रव्याणि । व्योमादेरीश्वरा
त्मन्येवांतर्भावात् । मनसश्चासमवेतभूतत्वाभावादिति । नवीनास्तु आत्मनमतं निराकर्तुं संख्याबोधकपद
पूरणेनार्थमाह ॥ एतानि नवेति । व्योमसत्त्वावच्छेदाकलयासिद्धिः । न च भगवत एव शास्त्रमतं । प्रत्येकं
जीवमात्रस्य विभिन्नत्वानविरहात् ॥ न च जीवानामात्रपदवाच्ये शब्दवानहमिति प्रत्यक्षापत्तिः । अदृष्ट
वद्योग्यस्यैव प्रत्यक्षानात् ॥ कालदिशौ स्तु एतस्मिन्काले पटः पूर्वस्यां दि[illegible] शि घट इत्याद्यनुगताका

१२५ रथस्य पातत्। मनस्सा समवेतभूतत्वे पार्थिवादित्र[illegible]सरेणुनादाय विनिगमनाविरहस्याशयः। अपि
कमत्वे व्यक्तौ भविष्यति। मूले द्रव्याणीति॥ द्रव्यपदं द्रव्यत्वरूपजातिविशिष्टार्थकं। ननु गुणत्वाश्रय
विशिष्टार्थकं गौरवात्। मुक्तावल्यां किं प्रमाणमिति किंशब्दः प्रश्ने॥ ननु द्रव्यं द्रव्यमित्यनुगतप्रतीतिरे
वजातिसाधिका भविष्यतीत्यत आह। नहीति। तत्र द्रव्यत्वजातौ। चैतेति। तथा च घटादिरूपा
मठाणां द्रव्यत्वस्य ज्ञानाभावेन सकलद्रव्यसाधारणद्रव्यत्व[illegible]जातिसिद्धिर्न संभवतीति भावः॥
कार्येति॥ कार्यसंयोगप्रतियोगित्वं। न च ध्वंसे साधारण्यं सत्वेन विशेषणीयत्वात्॥ अ
त्र च कार्यस्य समवायः प्रत्यासत्तिः। कारणस्य तादात्म्यं। यत्र समवायेन कार्यं तत्र तादात्म्येन
द्रव्यमिति नियमात्॥ ननु जन्यसत्वरूपकार्यत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणत्वमा
नो भावः। न च नीले नीलोत्पत्तिवारणाय तथात्वे तु त्वे मावश्यकमिति वाच्यं॥ समवायेन नीलं प्रति
स्वाश्रयसमवेतद्रव्यत्वसंबंधेन नीलत्वे तु तयैव तद्वारणात्कार्यत्वस्य कार्यतावच्छेदकत्वे गौरवात्॥
कालिकसंबंधेन घटत्वादिकमादाय विनिगमनाविरहाच्चेत्यत आह॥ संयोगस्येति॥ अत्र च
॥२५

रूपादिगुणानां सकलकर्मसाधारणण्याभावेन कर्मकार्यतयापरिभागः। सकलकर्मवृत्तिसं
ख्यादित्रयस्य च। गगनादिवृत्तिसंख्यादित्रयस्य नित्यत्वात् न च संयोगत्वावच्छिन्नं प्रतिकर्मत्वे
न समवायिकारणत्वे मानाभावः। न तु व्यक्तिसमवेतम[illegible]सामान्यं प्रति तद्व्यक्तित्वेन समवा
यिकारणत्वस्यावश्यकत्वेन तया गुणादौ तदुत्पादासंभव इति वाच्यं। कार्यमात्रवृत्तिजातेः कार्य
तावच्छेदकत्वनियमेन तादृशकारणत्वस्यावश्यकत्वात्। निरुक्तसंयोगांगीकर्तृमतसाधार
ण्येनाह। विभागस्येवेति कर्मत्वसिद्धिः। जातिरूपकर्मत्वसिद्धिः। क्वचित्त्वयं न पाठः। अत्र यद्यपि गु
णवत्वेनान्यथासिद्धिः। संभव[illegible]ति तथापि साक्षात्संबद्ध[illegible]धर्मबाधे सत्येवानुमितेः परंपरासंबंध
विषयत्वमिति भावः। इदमुपलक्षणं। कर्मवति कर्मांतरानुत्पत्त्या समवायेन कर्मस्य प्रतिबंधकत्वेक
ल्पे क[illegible]ल्पनीयमिति प्रतिबंध। तावच्छेदकतया कर्मत्वसिद्धिः। प्रति[illegible]बंधकतावच्छेदकं

च्ये ७

आ॰
।२९ पृथि[illegible]व्यादिचतुष्टयमात्रवृत्तिमूर्तत्वमेवनिरस्यव्यावर्तकत्वात्॥ मूर्तत्वस्यप्रतिबंधतावच्छेद
कत्वेतुमूर्तत्वस्यतथात्वमादायविनिगमनाविरहापत्तिः॥ द्रव्यत्वस्यप्रतिबंधतावच्छेदकत्वंतुघे
मि[illegible]मातकमानसिद्धं॥ नचतस्यगगनादिवृत्तित्वेमानाभावइतिवाच्यं। मूर्तत्वेनतुल्यव्य
क्तिवृत्तिकत्वापत्त्याविनिगमनाविरहेणगगनादिपंचवृत्तित्वाभ्युपगमात्॥ नचमूर्तत्वे
नतुल्यव्यक्तिवृत्तित्ववारणायमनोवृत्तित्वमेवद्रव्यत्वेकल्प्यतांगगनादिवृत्तित्वकल्पने
गौरवात्॥ गगनादिवृत्तित्वकल्पनेपिमूर्तत्वे[illegible]नसांकर्यवारणायमनोवृत्तित्वावश्यकत्वा
दितिवाच्यं। तथासतिमूर्तत्वेचजात्याद्रव्यत्वस्यतुल्यव्यक्तिवृत्तित्वापत्तिरिति॥ ॥ननुदी
दिमद्रव्यस्यतमसःसत्वान्नेवद्रव्याणीयेयुक्तं इत्यभिप्रायेणमीमांसकःशंकते॥ नन्वि
ति॥ ननुतमसिमानाभावादेवनायुक्तमित्याशंक्यतमःसाधकप्रत्यक्षप्रमाणमाह। तद्धीति॥
तमोहीत्यर्थः॥ प्रत्यक्षेणचक्षुरिंद्रियेण। ननुतमसःसिद्धावपितस्यद्रव्यत्वेकिंमानमित्या
शंक्यानुमानप्रमाणमाह॥ तस्येति॥ तमसइत्यर्थः। चकारोद्रव्यत्वमित्यनेनान्वेति॥ तथा
चेतमोद्रव्यं। रूपवत्वादित्यनुमानंतमसोद्रव्यत्वेप्रमाणंसूचितं॥ इदमुपलक्षणं। परत्वापि॥ २९॥

51

रत्वाश्रयत्वादिष्वपि बोध्यं ॥ इदं तमः परःस्मिदं(म) परस्मिन्निति प्रतीतेः ॥ ननु तमसि रूपे मानाभावः । न च
नीलं तमश्चलति प्रतीत्या तत्सिद्धिरिति वाच्यं । प्रतीतेर्भ्रान्तत्वादतो हेत्वंतरमाह । कर्मवत्वादिति । कर्म
वत्वं च समवायसंबंधेन विवक्षितं तेन जन्यमात्रस्य कालिकसंबंधेन कर्मवत्वेपि न व्यभिचारः ॥
न च स्वरूपासिद्धिः चलतीति छायेति प्रतीत्या कर्मवत्वसिद्धेः । तमसः कृसद्रव्येपंलभोवं निरकु
रुते । तद्दीत्यादिना । गंधेति । गंधाभावस्य हेतुत्वोक्तौ पटब्रातगंधप्रतियोगिताकाभावमादाय
घटे व्यभिचारोऽतः शुन्यत्वेमुक्तं । हेतुश्च प्रतियोगिव्यधिकरणः ॥ समवायसंबंधावछिन्न
प्रतियोगित ॥ कोपि बोध्यः । तेन नोत्पत्तिकालीन संयोगसंबंधावछिन्नगंधाभाववति वा घटे व्यभि
चारः । नीलरूपेति । अनुगतेनैव । नीलरूपेण हेतुना जलाद्यष्टभेदसिद्धेः । नेस्ताहाभावभा
स्वरूपाभावादीनामननुगतानां न हेतुतयोपन्यासः ॥ जलादिकमस्यादिना तेजः प्रभृति द्रव्य
संग्रहः । तथा नवसु द्रव्येषु अन्तर्भावासंभवेन परिशेषप्रमाणेन तमसोऽधिकद्रव्यत्वसिद्धिरिति भावः ॥

52

२८॥
तदुक्तं। तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हतीति॥ ननु तमसोऽप्र
त्यक्षत्वे आलोकनिरपेक्षेणं चक्षुरिन्द्रियेण ग्रहो न स्यात्। द्रव्यग्रहे त्वालोकसापेक्षचक्षुरिन्द्रियस्य हेतु
त्वादित्यत आह। तमस्यक्षे चेति। तमःप्रत्यक्षे चेत्यर्थः॥ तमोभिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव संयोगसं
बन्धेनालोकत्वेनैकारणत्वावधारणादिति भावः॥ आवश्यकतेजोभावेनेति। नरूपमतश्चेदुद्भूता
नभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः॥ अंधकाराभाव एव तेजः किं न स्यादिति तु न सम्यक्। ।
उक्तस्य चाक्षुषरूपबुद्धेरनुपपत्तेरिति सूचनायावश्यकपदं। उपपत्तौ। तमोऽन्यवद्दोपपत्तौ। ननु तमसस्तेजो
भावरूपत्वे रूपवत्ताप्रतीतिः कथमभावे रूपाभावादित्यत आह। रूपवत्तेति। ननु रूपवत्प्रतीतेर्भ्रान्तत्वेऽपि च
लतीप्रत्ययः सिद्धः कर्मवत्त्वे तु ना तमसि द्रव्यत्वं सेत्स्यतीत्यत आह। कर्मप्रतीतिरपीति। नहि द्रव्येऽन्योपा वत्ता
धिको भ्रमप्रतीतिरिति भावः॥ ननु प्रतीतेर्भ्रान्तत्वे तत्संततेर्नस्वीक्रियते यत्रोत्तरकाले बाधज्ञानं। प्रकृते च
तमो न चलतीति उत्तरकाले बाधज्ञानाभावात्। कथं प्रतीतेर्भ्रान्तत्वं संरक्षतो दूषणान्तरमाह। तम इति॥
अवयवादीत्यादिनाऽसत्तिध्वंसपरिग्रहः॥ यच्चारोपितं नीलरूपं तम इति कदलीकारमतं तन्न। इह ॥२८॥
इति अंधकारप्रतीतेरपि भ्रमत्वापत्तेः॥ तमो नीलं ननु नीलमिमे प्रत्यचाख्या। ननु तमसोऽनतिरिक्त

53

सेपि सुवर्णस्यातिरिक्तद्रव्यस्य सत्वान्नवत्वव्याघातस्तदवस्थ एवेत्यत आह। सुवर्णस्येति। वक्ष्यत इति। तेजोनिरूप
णावसरे इति शेषः॥ कंठत इति॥ रूपरसगंधस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे
बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणा इति विभागसूत्रे सप्तदशकंठोक्ताः॥ चशब्देन। सूत्रस्थच
शब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः समुच्चिताः। ते च सर्वे एकत्वाच्चतुर्विंशति
गुणा इह व्यवहृताः॥ ननु चतुर्विंशतौ किं नाम गुणत्वं। न च जातिविशेषः॥ तत्र प्रमाणाभावादित्यत
आह। तत्रेति। तेषु गुणे विस्पष्टः॥ अग्रे गुणनिरूपणावसरे लक्ष्यत इति॥ अव्यक्तमभिन्ने सामा
न्यवर्तित्याकारणता सा किंचिद्धर्मावच्छेद्याकारणतात्वात् इत्यनुमानं गुणत्वजातौ प्रमाण
मिति भावः॥ एतत्तच्चेतत्रैव स्फुटं भविष्यति। प्रत्यक्षसिद्धेति। चलनाकारानुगतप्रत्ययवेद्येत्यर्थः॥
अधिकृतयेति। कर्मविभाजकोपाधिभिर्भ्रमणचादिभिः॥ मुत्के गमनादेवेति। जयैवमुत्क्षेपणादीनां
मपि गमनादेवलाभे उत्क्षेपणत्वादिभिरपि विभागोऽनुचितः॥ नहि उत्क्षेपणादौ गमनत्वन्नानुभाविकं।
उर्ध्वमधश्च प्रक्षिप्तलोष्टादावूर्ध्वगत्यधोगतीति प्रसंगादिति चेन्न। सतंत्रैकस्य मुनेर्नियोग
पर्यनुयोगानर्हत्वादिति। तल्लक्षत्विति। लक्षणप्रयोजनं हीतरभेदस्य व्यवहारस्य वा सिद्धिः॥

घ१

१८। सामान्यमितरेभ्यो द्रव्यादिभ्यो भि[illegible]ने सामान्यमिति यवतारविपयो नित्यत्वे सत्यनेकसमवेतत्वात्। य
नैवं तन्नैवं। यथाद्रव्यमिति। एवं लक्षणान्तरेप्युह्यं समवेतत्व घटक समवायफलमाह।
नित्यत्वे सत्यनेकवृत्तित्वमिति। न चैवं नित्यसंयोगेऽतिव्याप्तिरिति वाच्यं। तस्यानि
रस्तत्वात्। कुतो निरास इति चेन्न द्रव्यनि[illegible]रूपित संयोगानिष्ठ कार्यतावच्छेदक कु
टो [illegible] जन्यत्व निवेसे गौरवात्। निसस योगां। गिकत्वेन य संयोगत्वस्यानि[illegible] सव
त्तित्वे [illegible]नेकार्यतावच्छेदकत्वात् तुल्ययुतया निसविभागासिव्याप सत्वेऽप्यनन्वा
कात्वरूपजातावव्याप्तिस्तस्यानेकसमवेतत्वाभावादित्याशंक्यालक्षणत्वेनो
तरमाह। एकमात्रेति। व्यक्त्यभेदरूपबाधकसत्वादिति शेषः। अनुगतधियो जातिकल्पि
काया आभावादिति भावः। ननु व्यक्त्यभेदस्य जातिबाधकत्वमेवासिद्धं। निःसामान्यत्वे ।।१८।
सतिविशेषान्यत्वे सति समवेतत्वस्य जातिलक्षणत्वादित्यतः संप्रतिमाह। तथापि

त्वमिति द्रव्यकिरणावल्यादौ उदयनाचार्यैरिति शेषः। वस्तुत्वस्यैकधर्मस्यैव सामान्यतया सर्वसिद्ध
त्वादेकव्यक्तौ जातिरनभ्युपेयेति भावः॥ व्यक्तेरभेदः। एकव्यक्तिकत्वमाकाशत्वादेर्जातित्वे बाधकं। तुल्यत्वं॥
तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादीनां जातीनां भेदे। वस्तुतः तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं स्वभिन्नजाति
समनियतत्वमिति यावत्॥ तच्च जातित्वबाधकमेवेति बोध्यं॥ संकरस्तु परस्परात्यन्ताभावसमा
नाधिकरणयोर्धर्मयोरेकत्र समावेशः॥ भूतत्वादेर्जातित्वे भूतत्वं विहाय मनसि वर्तमानस्य
सा मूर्तत्वस्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये सत्त्वात्॥ ननु सां
कर्यस्य जातिबाधकत्वे किं मानमिति चेत् समानाधिकरण्यस्याभावसामानाधिकरण्योभयसं
बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभावनियम
स्य भंगप्रसंग एवेति। तादृशनियमे मानाभावान्न सांकर्यं जातिबाधकमिति तु नव्याः॥ अ
नवस्थानात्तु जातेर्जातिमत्वे यद्यपि निखिलजातिवृत्तेर्वैजात्यस्यांगीकारे पितृजातौ सैव जातौ सा
न्तरमेव व्यक्तिकत्वात् तथापि निखिलजातिवृत्तेर्वै[illegible]स्यांतर्वैजात्यस्य नेदाश्रयेव जातिषु पुन
जा

56

२९ ॥

वैजात्यमेवमग्रेपीत्यनवस्था बोध्या। रूपहानिः निःसामान्यत्वगर्भलक्षणव्याघातरूपा
विशेषस्य जातिमत्त्वे। रूपस्य स्वतो व्यावर्त्तकत्वस्य हानिः। तत्र जातिस्वीकारे तयैव व्यावर्त्तक
त्वं वाच्यं। सामान्याश्रयस्य सामान्यरूपेणैव भेदसाधकत्वानियमात्। न च सामान्यरूपेणावि
शेषाणां भेदसाधकत्वं संभवेति। किं स्वव्यक्तिव्यापारात्। तादृशनियमानंगीकारे परमाणुग
तैकत्वादिना तत्तद्व्यक्तित्वेनैव परमाण्वंतरभेदसाधकत्वसंभवेन विशेषस्य वैयर्थ्यप्रसंगादि
ति तु ज्यायः। असंबंधः। प्रतियोगितानुयोगितान्यतरसंबंधेन समवायाभावः। समवाया
भावयोर्जातिमत्त्वात् तदपेक्षयाच्युति। सत्तापेक्षयाल्पेर्थः। सत्ताजातिश्च द्रव्यं सत् गुणः सं ॥ २९ ॥
त्रिसाद्यनुगतप्रतीतेर्वासिद्धत्वात्। अत्रेनव्याः। सन्निति प्रतीतिविषयो भावत्वमेव। अत एव
सामान्यादिष्वपि सदिति व्यवहारः न त्वतिरिक्ता द्रव्यादित्रिकवृत्तिनी सत्ताख्या जातिरिति। तेन पर

57

मपरं द्विविधं सामान्यं परं सत्तेति वैशेषिकविभागो निर्युक्तिकत्वाद् नास्यह साधुः। ततो सत्ताध्वं
सकारणतावच्छेदकतया सत्ताजातिसिद्धिः। यत्र प्रतियोगितासंबंधेन ध्वंसोत्पत्तिस्तत्र ता
दात्म्यसंबंधेन सत्तिसमानाधिकरण्यप्रयासस्या कार्यकारणभावाशान च प्रागभावे व्य
भिचारः प्रागभावे सत्तोविरहादिति वाच्यं। प्रागभावरत्तिप्रतियोगिताभिन्नप्रतियोगि
तायाः कार्यतावच्छेदकसंबंधत्वादिति। वस्तुतस्तु सत्तावच्छिन्नं प्रतितादात्म्येन ध्वं
त्वेन कारणतयालेत्यतावच्छेदकतया सत्ताजातिसिद्धिः। तादृशकार्यकारणभावमानाभावा
लितु ना। स्वाश्रयसमवेतत्वसंबंधेन नीलादेर्नैरल्यादावपि सत्त्वात्तत्र नीलोत्पत्तिवारणाय तादृ
शकार्यकारणभावस्यावश्यकत्वात्। तेन च स्वाश्रयसमवेतत्वविशिष्ट[illegible]मत्वसंबंधेन नी
लादेर्हेतुत्वे चैवं न तदापत्तिरिति वाच्यं। तादृशसमवेतत्वध्वंसत्वे योर्विशेषणविशे[illegible]ष्यभावे

58

३०॥ विनिगमनाविरहेण कारणताबाहुल्यापत्तेः। कालिकसमवायोभयसंबंधस्य कार्यतावच्छे
दकतावच्छेदकत्वासंतायानि ससाधारण्येपि क्षतिविरहादित्यन्यत्र विस्तारः। स्वतएवेति।
स्वतोभावृत्तेश्च स्वभिन्नलिंगजन्यस्य विशेष्यकस्य सजातीयभेदानुमितिविषयत्वात्। सा
जात्यंच पदार्थविभाजकोपाधिरूपेण तेन घटादेस्तादात्म्येनावृत्तत्वेपि विशेषस्य
गुणादिशून्यत्वेनेतरभेदानुमितिविषयत्वेप्यप्रयोज[illegible]पि प्रमेयत्वादिनाविशेषसजातीय
त्वेचन क्षतिः। नित्यद्रव्यवृत्तिरिति विशेषणांशस्थानकथनेन ननु तल्लक्षणप्रविष्टं। प्रयोजनाभावात्।
तत्र विशेषआवृत्तौ ननु एतत्परमाणुत्वादेर्व्यावर्त्तकाभावविष्यंति किं विशेषेणेति चेन्न। अन्याव
र्त्तधर्मस्य आवर्त्तक त्वोभावात्। तत्र आवर्त्तकान्तरापेक्षायामनवस्थानात्। ननु विशेषे
विशेषप्रसंग इति चेन्न तस्य धर्मि[illegible]र्मिग्राहकमानेन स्वतोव्यावर्त्तततयैव सिद्धेः। एवं च नित्यद्र 30॥

59

द्रव्येषु विशेषाः॥ सिद्धास्तद्गुणास्तु विशेषवंतः। आश्रयरूपेण विशेषेणो व तेषां आवृत्तत्वात्।
आश्रयस्य च विशेषवत्तं या आवृत्तत्वेन विशेषत्वसंभवादिति भावः॥ ईश्वराकाशयोः नित्यद्र
२पा नशङ्क्या आवृत्तेः संभवान्न तत्र विशेषद्वयसांतु॥ न विनास्तु। विशेषे अतिरिक्ते मानाभावः। यद्यपि
नविशेषाणां स्वआवृत्तिधर्मं विना आवृत्तत्वं तथा नित्यद्रव्याणामपी स्यात्तु॥ घटादीनां कपा
लादौ द्रव्येषु गुणकर्मणोः। तेषु जातेश्च संबंध इति मूलं। तत्र घटपदं कपालपदेऽवय
व्यवयवपरेऽत्याह। आवयवावयविनोरिति। जातेश्चेति चकारेण नित्यद्रव्येषु विशेष
संबंधः समुच्चीयतइत्याह॥ नित्यद्रव्यविशेषयोरिति॥ समवायस्य लक्षणमाह॥ नित्य
संबंधत्वमिति॥ संबंधश्चात्र संबंधिभिन्नो ग्राह्यस्तेन नित्यभावादिस्वरूपसंबंधे नाति
२धि व्याप्तिः॥ ननु समवायसंबंधत्वे किं प्रमाणमित्याशंक्याह। तत्प्रमाणं त्विति। गुणक्रियादी

३१॥ त्यावदिनाऽव्यातिपरिग्रहः। संयोगादीति द्रव्ययोरेव संयोग इति नियमादिति भावः। अत्र सम
वायसंबंधेन परत्वावछिन्नं प्रतितादात्म्यसंबंधेन तुल्यत्वेन हेतुत्वात्कार्यतावछेदकस
बंधविधया समवायसिद्धिः। न च समवायस्थाने स्वरूपसंबंधं निवेश्य कार्यकारण
भावः। कल्पनीय इति वाच्यं। तथा सति यत्समवेतं कार्यमुत्पद्यते तत्स्यादिसमवायिका
नर रण० प्रत्यावस्थायां स्यात्। न च यत्संबद्धं कार्यमुत्पद्यते तत्समवायिकारणमिष्टे वास्तु इति
वाच्यं। कपालसंबद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वप्रसंगादित्यपि द्रष्टव्यं॥
सिद्धसाधनमिति। अयुतसिद्धयोः स्वरूपसंबंध इति वदतः परस्येति शेषः॥ अर्थांतरं चेति॥
समवायसाधने ईश्वरवत्तोनां नैय्यायिकानां इति शेषः। ननु तथापि समवायस्यैकत्वे किमा ३१॥
नमत आह॥ लाघवादिति॥ न च यथा क्षित्यादिजनकतयैकचेतनवादेकत्वसिद्धिति॥
तथा समवायोपीत्यर्थः॥

रूपवत्ताबुद्धीति। रूपवत्ताबुद्धेः प्रमात्वप्रसंगात् इत्यर्थः॥ स्पर्शसमवायरूपसमवाययोरैक्यादिति भावः॥
तत्र वायौ रूपाभावादिति॥ न च रूपसमवायसत्त्वे तेन संबंधेन तत्र कथं रूपाभावः॥ संबंधस्य सत्त्वे
तेन संबंधेन संबंधिसत्त्वस्यावश्यकत्वादिति वाच्यं॥ रूपनिरूपितत्वविशिष्टसमवायस्यैव रूपसंबंधत्वात्
वायौ तदभावात्॥ न च विशिष्टस्यानतिरिक्ततया विशिष्टसमवायोऽपि वायावस्तीति वाच्यं। रूपनि
रूपितत्वविशिष्टसमवायनिरूपिताधिकरणताया एव रूपसंबंधत्वात्तस्य वायावभावात्॥ पृथिव्यां गं
धस्य समवायो न तु जले इत्यादिप्रतीतेः॥ समवायस्य नानात्वमिति नव्याः॥ संबंधांतरं अति
रिक्तपदार्थतयेति शेषः। सिद्धेदित्यस्य भूतलादावि[illegible]दिः॥ यदि वैशिष्ट्यमतिरिक्तमुररीक्रिय
येत तदा तन्नित्यमनित्यं वेति विकल्प्याद्ये दूषणमाह॥ तस्येति॥ ननु वैशिष्ट्यस्य तत्र सत्त्वेऽपि घटानय
न[illegible]दशायां तत्र घटाभावादेव न घटाभावबुद्धिरत आह॥ घटाभावस्येति॥ तत्र घटवति भूतले।
तस्येति। घटाभावस्य। अन्यथा घटाभावस्यानित्यत्वे चोद्देशांतरेपि। घटशून्यदेशेपीत्यर्थः। घट
त्वावच्छिन्नाभावस्यैकत्वादिति भावः॥ वैशिष्ट्यस्येति। वैशिष्ट्यस्य नित्यत्वाभ्युपगमपक्ष
इत्यादिः॥

तत्र घटानयनेन [illegible] घटवति । न च घटवति न घटाभावबुद्धिर्घटवत्ताज्ञानस्य प्रतिबंधकस्य सत्वादिति वाच्यं ॥
। घटवत्ताज्ञानविरहदशायां घटाभावबुद्धेर्जायमानायाः प्रमात्वप्रसंगादिति सत्तृतात्कीत् ॥ ननु सिद्धांतिनो
पि मते पाकेन रक्ते घटे श्यामरूपसमवायस्य सत्वात् ॥ श्यामरूपवत्ताधीः संगच्छत आह ॥ मम
त्विति ॥ द्वितीये दूषणमाह ॥ वैशिष्ट्यस्येति ॥ ननु वैशिष्ट्यानंगीकारे घटाभावभूतलयोः कः सं
बंधः स्वरूपमिति चेत् तथा सति घटशून्यत्वादशायामिव घटवत्त्वदशायामपि भूतले घटा
भावबुद्धिस्तव मतेपि स्यात् ॥ घटाभावभूतलयोः स्तत्स्वरूपसंबंधस्य च तत्र सत्वादत आह ॥ एवं चे
ति ॥ तत्कालीनमिति । घटाभावभूतलेऽभिमति ज्ञानकालीनमित्यर्थः ॥ तत्तद्भूतलादिकमि
ति । यत्र भूतले घटाभावबुद्धिस्तद्भूतलादिकमित्यर्थः । तत्तदभावानामिति ॥ यस्या यस्या भा
न वस्य बुद्धिस्तस्येत्यर्थः । तथा च स्वरूपमात्रं संबंधः किंत्वीदृशस्वरूपविशेष इति न पूर्वोक्ताति
प्रसंग इति भावः ॥ नव्यास्तु ॥ वैशिष्ट्यं पदार्थान्तरमेव । भूतलं घटाभाववदिति प्रत्ययात् ॥ स्वरूपसंबंधा
भ्युपगमे चाभावाधिकरणवस्य खंडभेदे तावन्मात्रविषयकज्ञानादिकमादाय विनिगमनाविरहे ।३२।
इत्याह ॥ द्रव्यादिषट्कभावोन्योन्याभाव इति । एतच्च द्रव्यत्वादि न प्रतियोगितावच्छेदकं ॥ अ

ननुगमात्॥ किंतु तत्तद्बहुसंख्यैर्वह्निप्रतियोगिताकभेदस्यमेवैष्टिसेति बोध्यं। वस्तुतो भावत्वं तथा बोध्यं॥
अत्र केचित्॥ भावभिन्नत्वाऽस्याभावत्वे भावत्वरूपविशेषणज्ञानेऽन्यकाले पटो नास्तीति ज्ञानानापत्तिः॥ प्रती
एवमन्योन्याभावत्वस्याभावत्वगर्भे स्याभावत्वेऽन्यतया; भावत्वस्यान्योन्याभावत्वगर्भत्वे अन्योन्या
श्रयापत्तिः॥ एवमभावत्वस्य भावभिन्नत्वरूपत्वे भावो न भाव इति वाक्याच्छाब्दबोधानुपपत्तिः॥
स्य। उद्देश्यतावच्छेदकविधेययोरैक्यादिति॥ तस्मादखंडोपाधिरनुयोगिताविशेषो वा। अ
भावत्वमिति वदंति॥ तत्र न्याः॥ अभावत्वस्याखंडोपाधित्वे प्रमाणाभावः। किंतु भावभिन्नत्वं॥
समवायसामान्याधिकरण्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावरूपं। तच्च रूपं वा
नुपस्थितमिति प्रकारः॥ एवं च घटाभावपदं भावप्रतीति नामभासोवां ऽनुगतत्वमप्युपपद्यते।
व न चाविषयितावन्नस्था सत्ताव्यक्तेः स्वरूपत एव प्रकारत्वोपगमात्॥ अतएव सत्तारूपप्रति
योगिज्ञानं विनापि घटो नास्तीति बुद्धेः सप्रकारः॥ अभावत्वप्रकारकप्रत्यक्ष एव प्रतियोगि
धियो हेतुत्वात्॥ अन्यथा इदं तत्र इति प्रत्यक्षमानापत्तेः॥ सत्ताभावरूपस्याभावत्वस्यानुप
स्थितस्य प्रकारत्वे विशेषणधियो हेतुत्वे व्यभिचार इति वाच्यं।

विशेषणभेदेन हेतुतावच्छिन्नत्वेन तत्र तद्धेतुत्वानुपगमात्॥ फलानुरोधित्वात्कल्पनाया इति प्राहुः॥
संसर्गान्योन्याभावभेदत इति मूलादेकः संसर्गाख्योऽपरोन्योन्याभावाख्य इति प्रतीतेः॥ तत्राप्युक्तं।
संसर्गस्याभावस्यानंगीकारादित्यत आह॥ संसर्गाभावेति। क्रमेण लक्षणद्वयोत्तर्शणमाह॥ संसर्गा
या भावत्वमिति॥ अन्योन्याभावे इति व्याप्तिवारणाय [illegible]न्योन्याभावभिन्नेति। घटादावतिव्याप्तिवारणाया
भावपदं एवमग्रेपि। तादात्म्येति। तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं प्रतियोगितानायां विवक्षितं॥
तेन संयोगावच्छिन्नप्रतियोगिताके संयोग्यत्वेनाभावेनातिव्याप्तिः॥ प्रागभावलक्षणमाह। विना
श्यभावत्वमिति॥ अत्र ध्वंसेतिव्याप्तिवारणाय विनाशीति॥ ननु प्रागभावसत्वे किं मानमिति चे
दुत्पन्नः पुनरुत्पादभिया न सिद्धिरिति प्राञ्चः॥ केचित्तु जातो घट इतिवदुत्पन्नो घटध्वंस इति
प्रत्यक्षबलेन नाशीतिरिष्यते॥ ननु प्रागभावः॥ इहेदानीं घटप्रागभाव इति लौकिकानां प्रस
पा[illegible]भावात्॥ न च तद्घटोपधायकत्वकपाले तत्संयोगादीनां तत्तद्घटप्रतिकाले 33 ॥
पि सत्वात्पुनरपि तत्तद्घटोत्पत्त्यापत्तिः॥ प्रागभावांगीकारे च तदभावादेव न पुनस्तदुत्प
त्तिरिवाच्यं॥ जन्यद्रव्यत्वावच्छिन्नं प्रतिजनकतया क्लृप्तस्य समवायसंबंधावच्छिन्नप्रति

योगिताकद्रव्याभावस्य विरहेणैव दतापत्त्यसंभवात्॥ न च जन्यद्रव्याभावस्य जन्योत्पत्तिकालीनो योत्
पत्तिकध्वंसाभावस्य वा हेतुत्वमित्यत्र विनिगमनाविरहेण तादृशद्रव्याभावस्य तादृशा
ध्वंसाभावानां च कारणतामपेक्ष्य लाघवादेक एव प्रागभावो हेतुः कल्प्यत इति वाच्यं॥ प्राग
भावकल्पनेपि तत्कालोत्पत्तिकानंतपदार्थप्रतियोगिताकानामनंतानां प्रागभावानां विनि
गमनाविरहेण हेतुतापादुर्वारत्वात् तथा च प्रागभावकूटपक्षेपि कल्पनागौरवं परमतिरिच्य
त इत्यालोः॥ अत्र वदंति। स्वानधिकरणेषु तंतुषु पटोत्पत्तिवारणाय सत स्वतंतुकपटस्थले
वतूनां तंतूनां तत्संयोगानां च तत्तद्व्यक्तित्वेन हेतुत्वे कल्पनापेक्षया एकप्रागभावस्य
हेतुता लघीयसी॥ अथैवमपि द्वित्रिचतुषु तंतुषु सत स्वतंतुकपटोत्पत्त्यापत्तिः।
न च चरमसंयोगव्यक्तेस्तद्व्यक्तित्वेन हेतुत्वान्नापत्तिरिति वाच्यं तथा सति स्वानधिकरण
तंतुष्वपि चरमसंयोगाभावादेव पटोत्पत्तिवारणसंभवे प्रागभावकल्पनानौचित्यादिति चेन्न॥ च
रमसंयोगस्य समवायघटितसामानाधिकरण्यप्रसासस्याहेतुत्वे तंसरतेपि समवायेन

घटोत्स्यात्तत्र समवायेन चरमसंयोगाभावेन व्यभिचारपसा कालिकसंबन्धेन तत्तद्घटावच्छिन्नं प्रति चरमोत्पन्नसंयोगव्यक्तेः कालिकसंबन्धेन हेतुतावाच्या ॥ तथा च स्वानधिकरणत्वं नु ष्वपि कालितया चरमसंयोगसत्त्वे घटोत्पत्तिवारणाय प्रागभावहेतुत्वस्यावश्यकत्वादिति ॥ एवमप्यस्तु कश्च नातिरिक्तः पदार्थस्तथापि तस्य सप्रतियोगिकत्वे प्रमाणाभाव इति तु न युक्तं ॥ ध्वंसस्य लक्षणमाह । जन्याभावत्वमिति ॥ प्रागभावेऽतिव्याप्तिवारणाय जन्येति । अत्यन्ताभावस्य लक्षणमाह । नित्येति । ध्वंसादिवारणाय नित्यपदं ॥ नन्वत्यन्ताभावस्य नित्यत्वे घटानयनानन्तरमपि भूतले घटो नास्तीति प्रतीत्यापत्तिरित्यत आह ॥ यत्र त्विति । तथा च संबन्धाभावादेव घटानयनानन्तरं घटात्यन्ताभावबुद्धिर्नेति भावः ॥ कालविशेषविशिष्टस्वरूपस्य संसर्गविधोपगमादेव घटवति घटो नास्तीति प्रतीत्यभावोपपत्तौ चतुर्थसंसर्गाभावे मानाभाव इति अस्वरसः केचिदित्यनेन सूचितः ॥ ननु मास्तु घटकाले घटात्यन्ताभावबुद्धिः घटोत्पत्तेः प्राक्काले तु स्यादित्याशंक्याह ॥ अत्रेत्यादिना । ननु तद्धित्वरूप प्रागभावाधिकरणेऽत्यन्ता ३४॥ भावस्यासत्त्वादित्यत आह । श्यामे घटेति । तत्रेति । ध्वंसप्रागभावयोरित्यर्थः । अत्यन्ताभावेन सहेति शेषः ॥

तथा च नव्यमते पूर्वपक्षिकथितशंकायामिष्टापत्तिरेवेति भावः ॥ युक्तं चैतत् । कथमन्यथा पूर्वमग्रेपि रक्तो
मध्ये श्यामो घटे रक्तरूपं नास्तीत्याकारकप्रत्ययः तस्य सामान्यावगाहित्वात् ॥ न चेदृशप्रत्यययोः रक्तिमध्वंसाव
गाही पूर्वापररक्तिमध्वंसप्रागभावेनवतिरिक्तेपि तादृशाकारप्रत्ययप्रसंगादिति । न च रक्तत्वावच्छिन्न
प्रतियोगिताकध्वंसप्रागभावयोरव्याप्यवृत्तित्वेनांतरा श्यामे रक्तं नास्तीति प्रत्ययस्तदा ध्वंसप्रागभा
वयोः सामान्यावच्छिन्नप्रतियोगिताकस्वीकारात् ॥ न च पूर्वापरमरक्तिमध्वंसवतिरिक्ते तत्र तदा तदन
भ्युपगमादिति वाच्यं । विनिगमनाविरहेण पदार्थांतरध्वंसप्रागभावयोरपि तत्स्वीकारप्रसंगेन गौरवात् ।
तदपेक्षया अत्यंताभावस्यांतराश्यामादौ सबंधकल्पने घंलोवादित्यन्यत्र विस्तरः ॥ नन्वभावस्तु द्वि
धेत्यादिविभागोनुपपन्नो भाव एव मानाभावादित्यभिप्रायेण शंकाकरः शंकते ॥ नन्विति ॥ अभा
वस्याधिकरणात्मकत्वे गौरवं प्रदर्शयितुमनंतेत्युक्तं ॥ अतिरिक्तेति ॥ भावातिरिक्तेत्यर्थः ॥ अ
भावस्याधिकरणात्मकत्वेऽभेदे आधाराधेयभावानुपपत्तिरूपो दोषो सोस्मन्मते नेत्याह ॥ एवं
चेति ॥ अधिकरणापेक्षया अतिरिक्ते चेत्यर्थः ॥ नन्वभावाधिकरणकाभावस्याधिकरणात्मकत्वेप
था ऽधाराधेयभावोपपत्तिस्तथा सर्वत्राप्यस्त्वित्यतो दूषणांतरमाह ॥ एवं चेति ॥ अन्यथा

१। अभावाधिकरणात्मकत्वे। एतेन। वक्ष्यमाणदूषणेन। परस्परधर्मितापन्नानां समपदार्थानामेव परस्परभेदकत्वं ज्ञापयितुमाह। इदानीमिति॥ पदार्थनिरूपणानंतरमित्यर्थः॥ तदनिरूपणे तत्तत्पदार्थघटितस्य साधर्म्यतया निरूपणासंभवादिति भावः॥ समानो धर्मो सधर्मः तस्य भावः साधर्म्यं॥ एवं वैधर्म्यमित्यत्रापीति भ्रमवारणाय बहुव्रीहिमाह॥ समानो धर्मो येषामिति॥ केवलान्वयित्वादिति॥ विषयभेदेन विषयतायाः भेदेपि ज्ञानविषयतात्वेन केवलान्वयित्वमस्त्वेवेति भावः॥ एवमग्रेपि। ज्ञेयत्वादिपदार्थं दर्शयति॥ एवमभिधेयत्वेति। अभिधेयत्वमभिधाविषयत्वं। अभिधा च संकेतः॥ प्रमेयत्वादिकमित्यादिना अस्तित्वपरिमितः॥ त[illegible]कालसंबंधित्वं। द्रव्यादीनां षण्णां साधर्म्यं भाववत्त्वं स्पष्टं। अतस्तदुपेक्ष्य द्रव्यादिपंचानां साधर्म्यमुक्तं प्रपंचितं द्रव्यादय इत्यादिना॥ अनेकत्वे सति भाववत्त्वमिति। एवं चमुक्ते द्रव्यादयः पंचेत्युक्ते द्रव्यपदं भावे अनेक इति विधेयपदमिति बोध्यं॥ अत एव भाष्ये पंचानामित्युक्तं। न तु पंचभावानामिति। ॥ अनेकभाववृत्तित्वादि॥ अत्र चानेकभाववृत्तित्वं ॥३५॥

स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसंबंधेन भेदविशिष्टत्वे सति भाववृत्तित्वं॥ तेन गुणा
दौ संख्यारूपस्यानेकत्वस्याभावेपि नाक्षतिः। भावत्वरूपतादृशधर्ममादाय समवायेऽतिव्या
प्तिवारणाय पदार्थविभाजकोपाधीति। उपाधिमत्ता च समवायस्वरूपसंबंधान्यतरसं
बंधेन तेन कालिकसंबंधेन ध्वंसस्य तादृशोपाधिमत्त्वेपि न क्षतिः॥ समवायोमाधिनो
मत्वविवक्षणे तु सामान्यादावव्याप्तिः स्यादतस्तन्नोक्तं। अन्यतरघटकस्वरूपं तु काति
कसंबंधभिन्नं ग्राह्यं तेन न ध्वंसेऽतिव्याप्तिः॥ अत्र च समवेतसमवेतवृत्तिपदार्थवि
भाजकोपाधिमत्त्वं द्रव्यादिचतुर्णां साधर्म्यं बोध्यं॥ उद्देश्यकवाचकपदस्य चरमसुपा
दानमयुक्तमतो योजनया तदर्थं प्रदर्शयति॥ द्रव्यगुणकर्मणामिति॥ निर्गुणक्रिय
इति मूलं॥ तदर्थश्च गुणक्रियात्यंताभाववत्त्वं तेन गुणक्रियान्योन्याभावमादाय द्रव्येनातिव्या
प्तिः॥ यद्यपि गुणेति॥ न च गुणगुणिनोर्वामदक्षिणगोविषाणवत्समानकालीनत्वात्कथं
गुणशून्यत्वमिति वाच्यं॥ निर्गुणे गुणोत्पत्तिः स्वीकारेण तत्संभवात्॥ न चैवं घटादेरा
द्यक्षणे चक्षुष्मत्ता न स्यादिति वाच्यं॥ इष्टापत्तेः॥ ६८॥

70

।। क्रियाऽन्यत्वमिति।। तथापीति।। गुणेति।। गुणवत्ता च समवायेन तेन कालिकसंबंधेन गु
णवद्गुणवत्ते गुणत्वादेरसंगतेपि न क्षतिः।। गुणवदवृत्तित्वं च समवायस्वस्वरूपान्यतर
संबंधेन तेन समवायेन गुणवदवृत्तित्वाभिधाने तादृशस्य द्रव्यत्वप्रकारकप्रमाविशे
ष्यत्वस्य द्रव्ये सत्त्वादतिव्याप्तिरयतेनैव तद्वृत्तित्वं वाच्यं।। तदा सामान्यादावव्याप्तिरिति
प[illegible]रास्तां। पदार्थविभाजकपदस्य कृत्यमाह। आशत्वादिकं त्विति। कर्मवद्वृत्त्या
काशत्वरूपोपाधिमत्याकाशेतिव्याप्तिवारणाय तदिदमिति भावः।। जात्यादी
नामप्येकार्थसमवायसंबंधेन सामान्यवत्त्वात्सामान्यपरिहीना इति क्रमले
मप्युक्तमतो व्याचष्टे। सामान्यानधिकरत्वमिति।। ~~[illegible]~~ तथा च सामान्यनि
रूपिताधिकरणता न समान्यादौ।। एकार्थसमवायस्याधिकरणतानियामकत्वादि भावा
धिभावः।। अप्रसिद्धत्वान्नू पारिमांडल्यपदार्थनिवृत्तिः।। पारिमाडल्यमिति।।
तद्भिन्नो नो पारिमाडल्यमिनो नो। ननु द्व्यणुकपरिमाणस्यापि कारणत्वाभावात् ३९ ।।
चातिव्याप्तिरतः पारिमाडल्यपदं द्व्यणुकपरिमाण

पी.

स्याणुपलक्षणं तेन तस्यापि लक्ष्यत्वमित्यभिप्रेत्याह। अणुपरिमाणं त्विति। परिमाणं द्व्यणुकसाधारणमणुपरिमाणं चेत्यर्थः। पारिमाण्डल्यस्य कारणत्वे बाधकमाह। तद्धीति। अणुपरिमाणं हीत्यर्थः। तत्रेति। द्व्यणुकस्यार्थे। तत्र हेतुमाह। परिमाणस्येति। स्वसमानजातीयेतीति। साजात्यमत्र परिमाणविभाजकरूपेण बोध्यम्॥ अणुजन्यस्येति। द्व्यणुकाणोरणुतरमेवेति भावः॥ न चाणुजन्यस्याणुतरत्वमस्तु किं बाधकमिति वाच्यम्। तथा सति त्रुटेर[illegible]चाक्षुषत्वप्रसंगात्। ननु तर्हि द्व्यणुकादिपरिमाणस्य किं जनकमिति चेत् संख्यैवेत्यवेहि। व्यक्तीभविष्यति चेदिदमुपरिष्टात्। मूलस्य न्यूनतां परिहरति॥ एवमिति। बोध्यो इत्यनेनान्वयः। न कारणानीति बोध्या इत्यर्थः। ऐन्द्रियकयोर्महत्त्वसामान्ययोः स्वविषयकलौकिकप्रत्यक्षहेतुत्वात्परमसातीन्द्रियत्वे इह विशेषणे॥ ननु योगिप्रत्यक्षे पारिमाण्डल्यस्यापि विषयविधया कारणत्वात् पारिमाण्डल्यभिन्नानामित्याद्ययुक्तमत आह। इदमपीति। तथा योगजधर्मेणातीतविषयकं प्रत्यक्षं तथा विद्यमानविषयकमपीति भावः। ननु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वेन ज्ञायमानहेतोः अस्यानुमितिकारणत्वेन पारिमाण्डल्यस्य सामान्यलक्षणाजन्यज्ञानेनुमितौ

॥ च कारणस्य पारिमाण्डल्यभिन्नानामिति मूले संमेगर्तं मतआत । ज्ञायमानेति । आत्ममानसेति । विषय-
तयाद्रव्यलौकिकप्रत्यक्षे समवायेव महत्त्वस्य हेतुत्वादिति भावः ॥ यद्यपि स्वप्रत्यक्षइत्येव वक्तु-
मुचितं तथापि टीकारुन्मते आत्मैकत्वमहत्त्वयोरयोग्यत्वात्प्रत्यक्षं न संभवतीति आ-
त्ममानसइत्युक्तं । केचित्तु कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्य इत्यत्रभाष्ये आदिग्रहणात्प-
रममहत्त्वस्यग्रहणमिति वदतामाचार्याणां मते मापरिमाणमपि न कश्चित्कारणमित्याश-
योलभ्यते । न च [illegible] तत्र परममहत्त्वस्य दमात्मपरिमाणातिरिक्तपरममहत्त्वपरिमितिवाच्यं ॥
मानाभावादिति वदंति तन्मतं दूषयितुमुपन्यस्यति । तस्यापीति ॥ आत्ममहत्त्वपरिमाणस्या-
पीत्यर्थः ॥ आचार्याणामुदयनाचार्याणां । ज्ञानातिरिक्तं प्रत्येवेति । कारणत्वं च ज्ञानधर्मेतरका-
र्यविवक्षयेत्याचार्यमतत्वर्थः । ज्ञानधर्मा ज्ञानादयः । तदतिरिक्तभावकार्यं प्रति कारणत्वं पारि-
माण्डल्यादिभिन्नानां साध्यमिति तदर्थः । एवं च पारिमाण्डल्यादिसूत्रादिपदेन परम- ३७ ॥
महत्त्वं गृह्णतामाचार्याणामयमाशयो यत्पारिमाण्डल्यस्य परममहत्त्वादीनां च
ज्ञानातिरिक्तं प्रति न कारणत्वं न तु कारणत्वसामान्याभावे सोदनुमतइतिभावः ॥

अत्र आचार्यैः परिमाणत्यादीसादिपदार्थेषु सुखदुःखादेरजनितायवि रूपादेः पाकजत्वपर

माणुरूपादेश्चागणनात्तेषां लक्ष्यत्वमनुमतं। एवं च तेषु सातिरिक्तकार्यफलोपधाय नाऽ

ण कत्वरूपस्याचार्यलक्षणस्याव्याप्तिं परिचिंत्य ससपससस्य कोमं यद्दतेति ध्येयं। सत्यन्य

थासिद्धिरिति। दंडत्वादेर्नियततायाः पूर्ववर्त्तितायाः सत्वादतिव्याप्तिरत उक्तमन्य

थासिद्धशून्येति। तद्धटत्वावच्छिन्ने सत्त्वे कूपरे न यतोऽन्यथासिद्धिमत्यपि घ

टत्वावच्छिन्नेऽनन्यथासिद्धत्वाद्रासभेतिव्याप्तिवारणाय नियतेति। नियतपूर्ववर्त्तिजाती

यत्वेत्यर्थः। तेनारण्यस्थदंडादावपि स्वरूपयोग्यतासंपत्तिः। तज्जातीयत्वं च नियतपूर्व

वर्त्तितावच्छेदकं दंडत्वादिमत्त्वमेवेति।। कियंति तानि कारणानीत्याकांक्षायामाह।। तत्स्ये

ति॥ यत्समवेतमिति। यदवच्छिन्नं स्वकारणतावच्छेदकयद्धर्मावच्छिन्ने समवायसंबंधेनो

त्पद्यते तद्धर्मावच्छिन्नस्य तद्धर्मावच्छिन्नमित्यर्थः।। घटत्वावच्छिन्नं स्वकारणतावच्छेदककपालत्वावच्छिन्ने स

मवायसंबंधेनोत्पद्यत इति भवति घटत्वावच्छिन्नं प्रति कपालत्वावच्छिन्नं समवायिकारणं। स्वकार

।३-चा। णतावच्छेदकेन तस्याश्च न द्रव्यत्वाद् घटादिसमवायिकारणतावच्छेदकत्वमिति। तत्रासत्त्वमिति॥ इदं च समवायिकारणादावतिव्याप्तिवारणाय। २ असमवायिकारणं तु समवेतं तन्तुत्वादावतिव्याप्तिवारणाय जनकमिति। तन्तुत्वे चान्यथासिद्धत्वेनानन्यथासिद्धनियतपूर्ववर्तिताया अभावेन नातिप्रसंगः॥ मुक्तावल्याम् अत्र यद्यपीति। तुरीतन्तुसंयोगस्य पटं प्रति कुतो नासमवायिकारणत्वमिति तु न शंकनीयं तुरीतन्तुसंयोगनाशे पटनाशापत्तेरसमवायिकारणनाशस्य कार्यनाशजनकत्वात्॥ न चासमवायिकारणनाशस्य कार्यनाशकत्वे प्रमाणाभाव इति वाच्यं। द्व्यणुकनाशान्यथानुपपत्तेरेव मानत्वादिति। न च तन्तुषु नष्टेषु विनैव समवायिकारणं क्षणं द्रव्यस्य स्थितिः स्यादिति वाच्यं। इष्टापत्तेः कारणान्तरकल्पने गौरवात्। न च कार्यासमवायि ॥३चा। नाशयोरसमानाधिकरणयोः कथं हेतुतेति वाच्यं। प्रतियोगितया द्रव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणतोभयसंबंधेन नाशत्वेन हेतुताया विवक्षितत्वाद्धारककालिकसंबंधस्य कारणतावच्छेदकसंबंधत्वे तत्पक्षे घटादेर्नाशापत्तिरतः स्वप्रति

योगिसमवायिसमवेतत्वनिवेशः। स्वप्रतियोगिजन्यस्य संबंधध्वंसदण्डनाशाद्घटनाशापत्तेरूपाधितः।
भाविनाशमादायातिप्रसंगवारणाय कालिकसंबंधप्रवेशः। यदि तु कपालपरंनसंयोगनाशात्तु घटनाश
पत्तिरेवमपि दुर्वारैवेति विभाव्यते तदा स्वप्रतियोगिजन्यत्वस्वप्रतियोगिसमवायिसमवेतत्वका
लिकविशेषणतैतत्त्रितयसंबंधेन नाशत्वेन हेतुता बोध्या। न चैवमपि तुरीतंतुसंयोगनाशा
त्पटनाशापत्तिरिति वाच्यं। तुरीतंतुसंयोगस्य पटं प्रति कारणत्वेन न किंतु पूर्वसंयोगसंबं
धेन तंतुनिष्ठा संततिपरंज्ञानैकेति न तज्ज्ञातिप्रसंगशंकापि। एवं चाविशेषलक्षणेषु तुरीतंतुसं
योगादिभेदानामप्रवेशेन लाघवमपीति केचित्। वस्तुतः स्वप्रतियोगिनिष्ठासमवायिका
रणतानिरूपितफलोपधानात्मकजन्यत्वसंबंधेन नाशत्वेन हेतुता। तुरीतंतुसंयोगस्य नि
मित्तं न च समवायीति न तन्नाशेन पटनाश इत्यन्यत्र विस्तरः॥ वेगादिनेत्यादिना स्य
शी परिग्रहः। अभिघातादीति। स्पर्शवद्वेगवत्संयोगः। मनःसंयोगाकाशसंयोगपारति
मापिरि स्पर्शवेगपदे। परनिष्ठपरमाणुसंयोगो लक्ष्य एव। न च ततोपि द्व्यणुकोत्पत्तिः स्यादिति वाच्यं।

76

विजातीयाभिघातस्य क्रियां तत्र कृत्वा तु। आदिना नोदपरिग्रहः। नोदना च स्पर्शवत्संयोगः। ज्ञानादी
३७॥ सत्वादिना इच्छापरिग्रहः। इच्छाद्वेषादयोत्र प्रवृत्तेः परिग्रहः। तत्तु समवेतत्वे सति तु रिक्तो तु संयोगा
द्यन्यत्वे सति पटकारणत्वे पटासमवायिकारणत्वमिति विशेषलक्षणं बोध्यम्। अभिसाहात्तथापीति।
वस्तुतस्तु तुरीतन्तुसंयोगस्यावच्छिन्नप्रतियोगिताकभेदः पटासमवायिकारणलक्षणघटकत
यावत्तं तत्कृत्वेनाभिप्रेतम्। अपि तु तन्तुभिन्नसमवेतत्वावच्छिन्नभेदएवान्यथा हस्तत्वं तु संयोगादि
भेदानां पृथक्त्वनिवेशापत्तेसाभेदपटोनिवेशोन गौरवादिति ध्येयम्। एतेन तन्तुमात्रसमवेतत्वानिवेशेन
रोपवत्वौ तुरीतन्तुसंयोगान्यत्वनिवेशनमनुचितमित्यपास्तम्। मानुपदस्यात्समइत्यनोर्थकत्वात्॥
एवमपि घटादिसमवायिकारणलक्षणे आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेदस्य वा तद्वैरूप्या
नन्वज्ञाने तच्चवदित्तं मेदतित्वो ध्येयम्। नैयायिके त्यादि विधेयप्रत्यासत्तिविवक्षणेऽचे सप्तः। हूलि नाद्य इ
तिद्विविधप्रत्यासत्तिसौरित्ति शेषः। पर्यवसितमसमवायिकारणलक्षणमाह। द्रव्यवेति। कार्येकार्थ ॥३७॥
प्रत्यासत्तिः समवायिसंबन्धः। कारणैकार्थप्रत्यासत्तिः स्वसमवायिसमवेतसंबन्धः। नेपाच
समवायसमवायिसमवेतत्वान्यतरसंबंधेन कारणत्वे सत्यात्मविशेषगुणान्यत्वं सामान्य
तोऽसमवायिकारणत्वासिद्धं। अत्र पटासमवायिकारणस्यैवं तु [redacted]

रूपस्य च संमतायस समवायस्य समवायिसमवेतत्वयोः प्रवेशः॥ घटरूपं प्रति घटस्यासमवा
नर २ यिकारणतावीरणाय लादृशायामस्यासत्त्वा समवायिकारणे प्रत्यासन्नत्वे सति कारणत्वं परित्यज्य
लादृशान्यतरत्वमस्यासत्त्वाकेरणत्वपर्यंतानुधावनं॥ आत्मविशेषगुणानारचितु विशेष्यभागः॥ न
तु सामान्यतः समवायिकारणत्वं दंडादावतिव्याप्तं कपालादिसामानाधिकरण्यसत्त्वात्। अन्य
था दंडादेः कारणतैव न स्यात्। समवायसामानाधिकरण्यरूपकारणतावच्छेदकसंबन्धभेदादनु
गमोपि। अथ कार्यनाशजनकनाशप्रतियोगित्वं तत्त्वमिति चेन्न। द्वित्वनाशप्रयोजकनाशप्रयो[illegible]ति
गिन्यामपेक्षाबुद्धावतिव्याप्तेरिति॥ अवयवमात्रसंयोगत्वं द्रव्यासमवायिकारणत्वमित्यादि
विशेषलक्षणं निर्वाच्यं। अखंडोपाधिरेव वा तदित्यन्ये। भिन्नकारणमिति। अत्रेदं बोध्यं।
समवायिकारणत्वासमवायिकारणत्वान्यकारणमेव निमित्तकारणं तेन तुरीपटसंयो
गं प्रति तुरीतंतुसंयोगस्यासमवायिकारणत्वेन तस्य पटं निमित्तकारणत्वक्षतिरिति।।
पकार्यं प्रतीति॥ पटत्वावच्छिन्नं प्रतीति। येन रूपेणेति। यद्रूपावच्छेदेनेत्यर्थः॥ इत्थं च तद्ध
र्मावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वसमनियतविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्नं

८० प्रतिस्यात्तत्राद्ये येनेतिरेकस्यान्वयसंतद्धर्मावच्छिन्नं प्रति अथन्यासिद्धत्वं प्रथममित्यर्थः॥ द्विति
यान्यथासिद्धं दण्डरूपादिवारणाय स संतं कपालसंयोगो घटपूर्ववृत्तेः स्यादि गन्हे कपालस्यापि
ताद्दशविशेष्यतावच्छेदकस्यात नातिव्याप्तिवारणाय विशेष्यं॥ किंतु कारणमिति॥ कारणत्वं चात्र पृ
थग[illegible]न्वयव्यतिरेकशालित्वं। तेन नात्माश्रयः। स्वातंत्र्येण तत्कार्यनिरूपितान्वयव्यतिरेकस्यान्यसे
सति तत्कार्यकारणावच्छिन्न[illegible]निष्ठतत्कार्यनियतपूर्ववृत्तित्वगतविशेष्यताकं य[illegible]तेन तत्कार्यं प्र
त्यन्यथासिद्धमित्यर्थः। कपालसंयोगो घटपूर्ववृत्तित्वगतविशेष्यतायाः कपालसंयोगनिष्ठायाः
कपालावच्छिन्नत्वात्कपालसंयोगे तिव्याप्तिवारणाय सस्संतं। दंडत्वादिवारणाय विशेष्यदलं॥ अत्रेत
तान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वमित्युक्तौ प्रथमद्वितीयान्यथासिद्धयोः संग्रहेपि
भेदेनान्यथासिद्धिरूपप्रदर्शनं शिष्यबुद्धिवैशद्यार्थमिति ध्येयं॥ अन्यं प्रतीति॥ फलाननुगुणमन्यं प्रतीत्यर्थः॥
तेनेन कुलालजनकेन्यतुर्थान्यथासिद्धत्वाश्रयेति व्याप्तिः शंकनं॥ शब्दान्वयचेनेति॥ अन्यं प्रतीत्यादितृतीया
न्यथासिद्धत्वाभावादिति भावः॥ पंचमीति॥ अवश्यक्लृप्तनियतपूर्ववर्तिन इत्यादिवेद्यार्थः॥ यद्यपि
शब्दोद्भवजन्यो त्तन्यगुणत्वादेरनुमित्यात्मककार्यकारणतावगततद्रूपानुकूलतर्कसह ८०

कृतेनैव शब्दो द्रव्याश्रितो गुणत्वादित्यनुमानेन शब्दाश्रयत्वं गगने गृहीत्वा तेन रू
पेण घटपूर्ववर्त्तित्वं ज्ञाप्यं ॥ तथा च शब्दपूर्ववर्त्तित्वं गृहीत्वैव गगनस्य घटपूर्ववर्त्तित्वग
तान्नतत्तायेवान्यथासिद्धिः संभवति ॥ न चाप्यन्यं प्रतीत्यस्य यथास्य तापकत्वेऽप्येवं प्र
ता यागस्य अन्यथासिद्धिः स्यात् स्वर्गं प्रति पूर्ववर्त्तित्वं गृहीत्वैव गृहीतकारणत्वान्य
थानुपपत्त्या यागव्यापारत्वेनापूर्वकल्पनादतोऽन्यं प्रति पूर्ववर्त्तित्वघटितरूपेण य
स्य यज्जनकत्वं तस्य तेन रूपेण तं प्रत्यन्यथासिद्धत्वमित्येतावत्सर्वं तं विवक्ष
णमावश्यकं ॥ यागस्य स्वर्गपूर्ववर्त्तित्वघटितस्वर्गजनकत्वेनापूर्वं प्रति अन्य
थासिद्धत्वेऽपि यागत्वेन हेतुत्वे अन्यथासिद्ध्यभावात् ॥ एवं च शब्दपूर्ववर्त्ति
त्वघटितशब्दजनकत्वेनापू[illegible]वं गगनस्यान्यथासिद्धत्वेऽपि तद्घटितशब्दो

१ श्रयत्वेन हेतुत्वे तृतीयान्यथासिद्ध्यसंभव इत्यभिप्रायः॥ शब्दाश्रयत्वाष्टद्रव्यातिरिक्तद्रव्या
दिनागगनस्य घटं प्रति हेतुत्वेपि तृतीयेनान्यथासिद्धिः॥ अन्यं प्रतिवृत्तित्वानुपपादकं यं प्रति नि३
यस्य पूर्ववृत्तिसंग्रहस्तत्र इस्यर्थीन्नात्पूर्वं प्रति यागस्यान्यथासिद्धिरित्यपि केचित्तु॥ केवल्या
दिकमिति। विनिगमनाभावेन बहूनां कारणतावच्छेदकत्वे गौरवाद्वर्णान्नामेसानेको
तौ नलोच्य॥ विशेषपदार्थो वेति। यत्कार्यजनकं प्रतीति॥ अत्रापि। अन्यप्रतीत्याद्य
भिधाने तृतीयचतुर्थान्यथासिद्ध्योः संग्रहे फलाननुगुणसतदनुगुणत्वयोर्विशे
षणयोरुपादानेन तयोर्भेदेनाभिधाने प्रयोजनाभावस्तथापि विशिष्टबुद्धिवैशिष्ट्या
यत्तथोक्तमिति। अवश्यक्लृप्तेति। गंधं प्रत्यवश्यक्लृप्तेन गंधप्रागभावेनैव गंधोत्पत्तिसं
भवे तत्सहभूतरूपप्रागभावादि पाकजगंधं प्रत्यन्यथासिद्धयेवं घटजातीयं प्रत्यव
श्यक्लृप्तनियतपूर्ववर्तिदण्डादिभिरेव घटोत्पत्तिसंभवे रासभोन्यथासिद्ध इत्यर्थः॥
नेनवश्यक्लृप्तनियतपूर्ववर्तिना पाकजरूपप्रागभावेन गंधोत्पत्तिसंभवे रूपप्रा ८१

गभावेन गंधप्रागभावस्यान्यथासिद्धिः॥ यत्कारणत्वमवश्यक्लृप्तमित्युक्तौ चात्माश्रयः स्यादिति चेदत्राहुः॥
क्लृप्तत्वं नियतपूर्ववर्त्तित्वरूपमवश्यक्लृप्तत्वमिह बोध्यं। लघुत्वं च शरीरकृतमुपस्थितिकृ
तं संबंधकृतं च तत्र प्रथमे मनेकद्रव्यत्वापेक्षया महत्त्वे। द्वितीयं गंधं प्रतिरूपप्राग
भावापेक्षया गंधप्रागभावे गंधात्मकप्रतियोगिज्ञानसत्त्वेन शीघ्रं तदुपस्थितेः॥
तृतीयं दंडत्वं दंडरूपाद्यपेक्षया दंडस्वाश्रयदंडसंयोगादिघटितपरंपरया गुरुत्वादि
ति। ननु निवेशांतरे ऽन्यत्रक्लृप्तेति दृश्यते तत्कथमवश्यक्लृप्तेति। कृते मे तस्य फल
मात्॥ अत एवेति। अन्यथा महत्त्वस्याऽनेकद्रव्यत्वादन्यत्रक्लृप्तनियतपूर्ववर्ति
त्वाभावेन तस्यान्यथासिद्धिर्महत्त्वेन न स्यादिति भावः। अत्रानेकद्रव्यत्वं ना
नेकद्रव्यसमवेतत्वं। तस्य द्व्यणुकेऽपि सत्त्वेन द्व्यणुकप्रत्यक्षापत्तेः॥ समवेत

२ समवेतद्रव्यसंतद्वित्यपिना। मे ओ नितस्याभावेनात्मप्रत्यक्षानुपपत्तेः॥ किंत्वँ[illegible]भिन्न ण्१
द्रव्यत्वमिति बोध्यं॥ अन्येषां॥ दंडत्वरूपाकाशकुलालपितृणां। अनेन पंचमान्य
थासिद्धेन चरितार्थत्वं संग्रहः। अनियतरासभादेर्वारणाय नियतेति। न चा[illegible]
नियतरासभादेः पंचमान्यथासिद्धत्वात्तेनैव वारणे नियतपदं व्यर्थमिति वा
च्यं। अवश्यक्लृप्तत्वस्यैकस्याभावेन वययेवेत्र प्रामाणिकानां व्यवहारस्तदे
दस्य निवेशानीयतया नियमेनैव रासभादेर्वारणेन तद्दस्याप्रवेशादित्यभिप्रायेन।
पूर्ववर्तित्वं चाव्यवहितपूर्ववर्तित्वं तेन व्यवहितपूर्ववर्ति व्युदासः। अत एव च यागादेः
स्वर्गकारणत्वानुपपत्त्याऽपूर्वकल्पनया पूर्वसंबंधेनाव्यवहितपूर्ववर्तित्वोपादानं गम्य
४

हतां संगच्छते। अन्यथा यागस्यापि नियतपूर्ववर्त्तित्वाबाधेनापूर्वकल्पनं न स्यादिति। न चैतादृश
स्य कारणत्वे व्यतिरेकव्यभिचारज्ञानस्य नियमांशग्रहे ग्नाघाका। वावगाहित्तूयाविशेषितत्वे
यच्च यव्यभिचारग्रहस्य कथं कारणताग्रहविरोधित्वमिति वाच्यं। अवश्यक्लृप्तस्याघाभा[illegible]
न्यथासिद्धिज्ञानप्रयोजकत्वात्। तदितरनिखिलतत्कार्यकारणसत्वे तत्कार्यव्यतिरेकाय
व्यतिरेकात्। तेनावश्यक्लृप्तेनैव नियतपूर्ववर्तिनान्यथासिद्धत्वे ज्ञानानातानन्यासक्तकारण
त्वस्यानन्यथासिद्धनियतपूर्ववर्तितावच्छेदकधर्मत्वे प्रतिबन्धकाभावस्य तत्तेछात्तित्वे
नेहेतुतापत्तिः। यत्र न कारणत्वव्यवहारस्तत्रैदृढकूटवत्वंतु सर्वज्ञेनैवसेयं। नन्वघातितेन द
कूटवत्वे संबद्धेन कार्यविशिष्टो यो धर्मस्तत्वे तादियपि न युक्तं। तस्य संबन्धत्वे संदेहात्।
तस्मात्कारणत्वे पदार्थान्तरमेवेत्याहुः। तदसत्। कारणधर्मस्यातिरिक्तत्वे दंडादौ संदेहो
तत्प्रसक्तापत्तेः। न चानन्यथासिद्धत्वे सतीसादौ ~~मोवकोस्यवांयत्वादिकोधीसंबंधि~~

ज्ञानस्यावश्यकत्वेन तस्यैव कारणतामतद्रूपत्वौचित्यात्। अस्तु वा दंडत्वादिकमेव कार
णत्वं। घटादिकार्यसंबंधितया तद्गतैकधर्मस्य व्यंजकत्वादिति। परे तु। कार्यान्वय
व्यतिरेककालपूर्वकालान्वयव्यतिरेकशालित्वमुक्तं च तदयुक्तं। आत्मादौ सुखादिकार
णे प्रागभावरूपव्यतिरेकासंभवेनाव्याप्तेः। मूले गुणकर्ममात्रवृत्ति समवायिकारणमु त्वे४
क्तं। तत्राप्युक्तं आत्मविशेषगुणेष्वव्याप्तेरतो वैधर्म्यपरतया मूलं व्याचष्टे। असमवायिका
रणत्वमिति। साधर्म्यप्रकरणे वैधर्म्यकथनमयुक्तमित्यारुच्यादाह। अथवेति। सत्ता
भिन्नद्रव्यत्वरूपजातिमति द्रव्येऽतिव्याप्तिवारणायावृत्तत्वं। तत्रैव सत्ताजातिमादायातिव्या
प्तिवारणाय सत्ताभिन्नेति। तत्रैव द्रव्यगुणान्यतरत्वरूपधर्ममादायातिव्याप्तिवारणा ॥८३

यज्जानातीति॥ वृत्तित्वं च जातिमत्त्वं च समवायेन विवक्षितं॥ तेन न गुणादौ द्रव्यत्वस्य कालिके न वृत्तित्वात्॥
द्रव्यस्य च कालिके न गुणत्वादिमत्त्वात् द्रव्येऽतिव्याप्तिः॥ ननु गगनादिकं सर्वं दैवास्तीत्यादिव्यवहारा
न्नित्यद्रव्येष्वपि कालिकसंबंधेनाश्रितत्वसत्त्वादन्यत्र नित्यद्रव्येभ्य इति मूलमयुक्तमत आह॥
आश्रितत्वमिति॥ समवायादिसंबंधेनासर्वाधारतानियामककालिकसंबंधातिरिक्तसंबंधेन
विशेषणतया चेति। कालिकविशेषणतयेत्यर्थः। अत्र नित्यद्रव्यातिरिक्तत्वं लक्ष्यतावच्छेदकं। न च संयोगेन परमाणोरपि कालेऽ
परमाणावृत्तित्वा। आश्रितः। तत्संयोगस्य वृत्त्यनियामकत्वादिति। क्षित्यादीनां नवानामित्यादीति। तत्र लक्ष्यस्तु शब्देन सूचि
तमर्थं प्रकटयति॥ इदानीमिति। ननु धात्वर्थः क्रियात्वजातिप्रसंग इत्यत आह। कर्मवत्त्वमिति। वेगत्वं वेगसंबंधित्वं।
दिक्कृतयोः परत्वापरत्वयोर्हेतुरिदमस्मात्सन्निकृष्टमित्यपेक्षाबुद्धिः। कालकृतयोः परत्वापरत्वयोर्हेतुरयमस्मा
दल्पतरकालसंबद्धतरत्वापेक्षाबुद्धिश्च यत्र नोत्पन्नौ तत्र परत्वापरत्वयोरनुत्पादादव्याप्तिमाशंक्य निरस्यति। न चेत्या

८६

5

दिना। आत्मन्यति व्याप्ति वारणाय समानाधिकरणांतं। तन्नैव सत्तामादाय तिव्याभिवारणाय द्रव्य[illegible]त्व व्याप्येति। द्रव्यत्वौन्यते
नां जातिविशेषणतया॥ तेन द्रव्यत्वव्याप्यद्रव्यत्वमादाय तिव्याप्तिः। अपकृष्टेति। अविभुवृत्तिपरिमाणवत्त्वमित्यर्थः
[illegible]वी ति न परिमाणेन व्याप्तिः। क्रियाजनकतावच्छेदकतया मूर्त्तत्वं जातिरि सपिकेवलं। तच्चिन्ति। निरुक्त मूर्त्तत्वं चेस
र्थः। त्वस्त्वेवौ। पूर्वदति। परत्वपरत्वसमानाधिकरणत्वादिकं धि। न विवक्षितमार्थवदित्यर्थः। कालादौ स्पंदाभावि
ना संभावात् माश्चाक्याह। सर्वत्रेत्येति। अहमाहानिति प्रतितिविषयपरममहत्वेत्वस्यागगनपरिमाणादि
साधारणस्य जातित्वसंभवेप्याणुपरिमाणमेयाग्यमिति तिटिकाद्व[illegible]मेतमनुसृत्याह॥ अपकर्षेति।
यद्यप्यणुपरिमाणं लघुत्वाणुकपरिमाणमेवापकर्षाश्रयो न परमाणुनि व्याभिवारणाय बहिःपदो बहि
। दा रिंद्रियग्राह्यजातीयसंयोगादिमिति कालादौ वृत्ती व्याभिवारणाय विशेषेति। विशेषणं गुणवत्त्वं च

४४

87

गुणनिरूपणलक्ष्येवेति। द्रव्यत्वमादायातिव्याप्तिवारणाय गुणेति। लौकिकत्वनिवेशस्य फलमाह। नेनेति।
[illegible] ज्ञातो घट इति ज्ञाने च प्रकारीभूतज्ञानांशेन लौकिकविषयता चक्षुरादेरसत्त्वे लौकिकसन्निकर्षा
भावादिति भावः। स्वरूप[illegible]योग्यताप्रवेशस्य फलमाह। नचेति। ननु परमाणुरूपादेर्योग्यत्वे कुतो न
तस्य प्रत्यक्षमत आह। महत्त्वेति। लौकिकविषयतया द्रव्यसमवेतप्रत्यक्षे सामाना[illegible]नाधिकर[illegible]
ण्य संबंधेन कारणस्य महत्त्वस्य परमाणुरूपादावभावान्न तल्लौकिकप्रत्यक्षमिति भावः॥
ननु चक्षुरिंद्रियादिगतरूपादिविशेषगुणानामनुद्भूतत्वेन बहिरिंद्रियग्रहणायोग्यत्वात्
चौ चक्षुरादावव्याप्तिमाशंक्य लाघवा[illegible]ह। अथवेति। अत्र कल्पे दैशिकपरत्वापरत्वमादाय मन
स्यतिव्याप्तिवारणाय विशेषेति। स्पर्शत्वैवे समानावेन। द्रव्यसमवायिकारणेत्यादि

।।।

सत्तादिकमादाय गगने ऽति व्याप्तिवारणाय द्रव्यत्वव्याप्येति ।। आकाशशरीराणि तु यत्र म्ले शरीरिप
दमास परमित्यभिप्रायेणाह । आकाशस्य नामिति । ऊक्षेऊक्षरां गौयितुं शब्दस्य नाडि दीनामव्यप्पव ह
प त्तिसंक्षणिकत्वं चोपपादयति । आकाशस्यादिना । क्षणिकस्य विशेषगुणस्यानभ्युपगमादाह । क्षणि
कत्वं चेति । घटादिव्यावृत्त- येत्स्तीयक्षणवृत्तीति । स्वोत्तरवतीति । स्वपदं नाश्यत्वाभिमतपरं । त
उत्तरवर्त्तित द्वितीयक्षणावृत्ति योविशेषगुणस्तत्त्वस्यत्वादित्यर्थः । अत्र चतिप्रेयत्वयोगितासंबंधे
नयोग्यविभुविशेषगुणनाशत्वस्य सामानाधिकरण्यस्याव्यवहितपूर्ववर्त्तित्वोभयसंबंधेन योग्य
ग्यविभुविशेषगुणइति समानाधिकरण्येन न शब्दत्वे बोध्यं । कार्यत्वावच्छेदके योग्यतानु
पादाने प्रायश्चित्तादिजन्यादृष्टनाशे व्यभिचारः ।। योग्यत्वं च लौकिकसाक्षात्कारविषय । ४५ ।।

८९

निर्विकल्पान्यतरत्वमतींद्रियजातिमन्यत्वं वा रूपनाशेऽव्यभिचारवारणाय विशिष्येति। संयोगादिना
६ शेऽव्यभिचारवारणाय विशेषेति। कारणतावच्छेदके योग्यविशेषत्वयोरुपादानान्न द्वितीयक्षणोत्पन्ना
दृष्टसंयोगादिना तृतीयक्षणेऽपेक्षाबुद्धिनाशः समानाधिकरण्यसंबंधनिवेशान्नाचापि व्यधि
करणनामिच्छादीनां नाशः। स्वाव्यवहितपूर्ववृत्तित्वनिवेशाच्च न ज्ञानादीनामुत्पत्तिकालि
कध्वादीनां नाशः। कि[illegible]चित्तु। स्व स्वस्य तत्तद्व्यक्तिपर्यवसायितया तत्तद्गुणस्य तद्गुणनाश
कः। अपेक्षाबुद्धेस्तु द्वित्वप्रत्यक्षमित्याहुः। एतत्क्षणोत्पन्नयोग्यविभुविशेषगुणत्वे
न नाश्यता। एतत्क्षणोत्तरक्षणावृत्तित्वविशिष्टयोग्यविभुविशेषगुणत्वेन नाशकतां

२

90

व्या

ता। अपेक्षाबुद्धिनाशो च द्वित्वप्रत्यक्षाविशेषसामग्री॥ चरमज्ञानादिकं तु उत्तरक्षणवृत्तिस्वविशिष्टस्व
यमेव नाशकं। एतत्स्सलेण सन्न सकलविशेषगुणसाधारणं चेदिति प्राहुः॥ शब्दस्याव्याप्यवृत्तित्वक्षणिक
त्वे उपपाद्य ज्ञानादीनामपि ते उपपादयति। एवमिति। क्षणिकपदस्य वैय्य[illegible]र्थ्याद्धुक्षणद्वयाभिप्रा
येणार्थमाह॥ द्वक्षं चेति। अव्याप्यवृत्तीत्युक्तमिति। न च रूपादीनामपि कालिकाव्याप्यवृत्तित्वात् कथं तद्वार
णमिति वाच्यं। अव्याप्यवृत्तिपदेन दैशिकाव्याप्यवृत्तित्वस्योक्तत्वात्। विशेषगुणइत्युक्तमिति। विशेषगु
णाश्च बुद्ध्यादिषट्कस्पर्शान्ताः स्नेहः सांसिद्धिकोद्रवः। अदृष्टभावनाशब्दा इति वक्ष्यमाणास्तल्लक्षणं
गुणनिरूपणे वक्ष्यते। यत्तु। अव्याप्यवृत्तिविशेषगुणवत्त्वमीश्वरे[illegible]व्याप्तं। तद्गुणानां व्याप्यवृत्तित्वादि
ति। तन्न। अव्याप्यवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। चतुःक्षणवृत्तीति।। ४६॥
तुंचेत्क्षणवृत्तीनि यानि जन्यानि च्ययादीनि तद्वृत्ति ~~पदेन दैशिकाव्याप्यवृत्ती~~

~~[illegible]~~। यी जातिज्ञानत्वादिसत्त्वाद्विशेषगुणो ज्ञानानित्यत्वञ्चेत्स्यात्मादौ
सत्त्वाल्लक्षणसमन्वयः॥ अत्र चावृत्तित्वं समवायेन विवक्षितं। तेन जन्यमात्रे
कालिकेन ज्ञानत्वस्य वृत्तित्वेपि न क्षतिः। वस्तुतं च ज्ञानत्वादेर्जन्यवृत्तित्वा
दसंभवारणाय। तदर्थं त्वादिति॥ क्षणिकविशेषगुणत्वं त्वार्थत्वादिसर्वः। ननु त्रिक्षणवृत्तित्वमुपे
क्ष्य चतुःक्षणवृत्तित्वपर्यंतानुधावने प्रयोजनभावः॥ न च त्रि-त्वे च चतुःयाल्लाघवगौरवविरहेस चतुर्थोपादा
नेर्द्धेव नियामाभावकेति वाच्यं। प्रथमोपस्थितत्वरूपात्लाघवस्यात्रित्वे संभवादत आह। अपेक्षाबुद्धिरिति।
तथा चात्रिक्षणवृत्तित्वप्रवेशे सान सस्यसंग्रहो न स्यादिति भावः। चतुःक्षणवृत्तिजन्यावृत्तिजातित्वस्य फ
लमाह। रूपत्वादिकं त्विति। तस्य व्युदासः रूपत्वजातिव्युदासः। तथा च रूपसजातिमद्विशेषगुणवनि
घटादौ चातिव्याप्तिः सा निरस्तेति भावः। जन्येत्यस्य फलमाह। ईश्वरेति शरीरिणामित्यत्र मूल शरीरिपद

स्य यथाश्रुतार्थकत्वाभिप्रायेणाह। यथाकाशजीवात्मनोरिति। ननु जन्यत्वाप्रवेशे ज्ञानत्वेच्छात्वप्रयत्नत्वजा
आ. तीनां चतुःक्षणवृत्तित्वाभावात्कथं लक्षणसमन्वयः॥ इत्यत आह। द्वेषत्वाः ।दिकमिति। आ
दिनाशब्दत्वपरिग्रहः। विशेषपदस्य कृत्यमाह। परिमहत्वस्येति। नादृशगुणवत्वादिति। चतुःक्षणवृत्ति
न. जन्यावृत्तिजातिमद्गुणत्वादित्यर्थः। ननु परममहत्वं जातिः। किंत्वपकर्षानाश्रयपरिमाणत्वमित्युक्तं।
तथा च कथं तमादायातिप्रसंग इत्यत आह। चतुःक्षणे द्वित्वादीनामिति। यदा ननु जन्यपदानुपादाने
च परममहत्वस्य चतुःक्षणवृत्तिवृत्तित्वान्न परममहत्वमादाय कञ्जादाविति व्याप्तिरत आह। चतुर्थक्ष ॥४७।
णे द्वित्वादीनामिति। तथात्वादिति। तथात्वानाद्दशजातिमद्गुणत्वादित्यर्थः। प्रथमोपस्थितत्व
रूपलाघवमभिसंधायाह। चिक्षण इति। चक्षुरादीनामित्यादिना प्राणादिपरिग्रहः॥ तत्रापि

चक्षुरादिकमपि पृथिवीत्वादौ द्रव्यत्ववद्वृत्तित्वमुपपादयति । घ्राणजत्विस्यानन्ति न । योगिप्रत्यक्षविषयत्वंसंख्या
दाह । अतिव्याप्तं चैति । घटो वायुमानितिवाच्ये सोऽपनीतभानात्मकघटेऽविशेष्यकचाक्षुषविषयवायुवृत्ति
द्रव्यत्वे व्याप्यवायुत्वजातिमतिवायावतिव्याप्तिवारणाय लौकिकेति । गुरुत्ववत्त्वमिति । गुरुत्वं रत्तिकैमा
षकतोलकसेरादिहेतुमुपलक्षणं । पतनवत्त्वमित्यपि बोध्यं । पतनत्वं गुरुत्वासमवायिकारणककर्म
त्वं गुल्कापततीत्यादिप्रयोगास्तु लाक्षणिकाः । वस्तुतस्तु । गुरुत्वासमवायिकारणकक
र्मवृत्तिपतनत्वं जातिविशेषएव । ननु सत्त्वानां साधर्म्यं ज्ञेयत्वं न तत्तस्य वैधर्म्यमित्याशं
कायामाह । ज्ञेयत्वादिकमिति । वायोर्नवैकादशतेजसो गुणा जलक्षितिप्राणभृतां । चतु
र्दश दिक्कालयोः पंचषडेव चांबरे महेश्वरेऽष्टौ मनसस्तथैव चेति ॥ १ ॥ प्राचीनग्रोक्तक्रम
मनुसृत्य वायोस्तावद्गुणानाह । मूले स्पर्शादयोऽष्टाविति ॥ स्पर्शसंख्यापरिमाणपृथक्

९५

संयोगविभागपरत्वापरत्वान्य ●। ह्येवेगाख्यसंस्कारश्चेति वायोर्गुणा इत्यर्थः।। तेजसो गुणानाह। स्पर्शादयोष्टाविति। अपां गुणानाह स्पर्शादयोष्टाविति। पृथिव्या गुणानाह। स्नेहरहिता इति। एते। अव्यवहितपूर्वोक्ताः। आत्मनो गुणानाह। बुद्ध्यादिषट्कमिति। बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नाः संख्यादिपंचकं संख्यापरिमाणपृथक्त्वसंयोगविभागाः। कालदिशोर्गुणानामैक्यादेको ह्येवाह। संख्यादिपंचकमिति। आकाशस्य गुणानाह। शब्दश्चेति। तथा चाकाशे शब्दः संख्यादयः पंचैवं षड्गुणा इत्यर्थः। ईश्वरस्य गुणानाह। संख्यादय इति। अत्र नव्याः। ईश्वरपरिमाणवत्वे मानाभावः। नव पृथक्त्वे चेन तदनुमानामिति वाच्यं। अप्रयोजकत्वात्। ईश्वरद्वैचसत्वे मानाभावाच्च। अत्र एवं तत्र संयोगविभागयोः सत्वेपि मानाभावः। एकपृथक्त्वस्य च गुणत्वमेव निरस्तं। यथा ईश्वरस्य सुखं तथान्ये व्यक्तीभविष्यति। एवं च संख्याबुद्धीच्छाप्रयत्नसुखानीति पंचैवेश्वरस्य गुणा इत्याहुः।। इति श्रीभारद्वाज। मरदबालकृष्णात्मजमहादेवभट्टनौ मुक्तावलीप्रकाशे प्रपपरिच्छेदः।।१।।

गंधहेतुत्वे कालादेरातमतो व्याचष्टे गंधेति । गंधवद्वृत्त्यत्यन्ताप्रतियोगिमत्त्वमर्थस्तेन सुरभ्यसुर
भिकपालारब्धाति गंधघटे नाव्याप्तिः । तत्संयोगेन जलादावतिव्याप्तिः । तद्द्रव्यत्वव्याप्यत्वस्य नेनन
तत्रैव सत्त्वात्तामादाय सा । नवाजीति पदोपादानाज्जलपृथिव्यन्यतरत्वमादाय गंधवत्त्वं वृत्तित्वं
च समवायेन । तेन कालिकसंबंधेन गंधावति समवायसंबंधावच्छिन्नवृत्तिमज्जलत्वादिमति
पृथिवीनिरूपितकालिकसंबंधावच्छिन्नवृत्तित्ववज्जलत्वादिमति जलादौ नातिव्याप्तिः ॥
प्रमाणोपन्यासायेति । यद्यपि पृथिवीत्वस्य प्रत्यक्षतया न प्रमाणांतरापेक्षा तथापि [illegible]ना
प्ययोग्यसाधारण्येन प्रत्यक्षासंभवात् । तत्साधारण्येन पृथिवीत्वासिद्ध्यर्थं तदुपन्यास
इति भावः । अन्यथा गंधवत्त्वावच्छिन्नं प्रति पृथिव्या हेतुत्वानंगीकारे ॥ आकस्मिकत्वा
पत्तेरिति । नियतकारणानियम्यत्वापत्तेरित्यर्थः ॥ तथा च कार्यमात्रवृत्तेर्गंधत्वस्य
कार्यतावच्छेदकत्वानुरोधेन तदवच्छिन्ने पृथिवीत्वेन हेतुत्वमावश्यकमिति भावः ॥

९६

६१ द्रद्मुपलक्षणं। रूपादिनाशकतावच्छेदकतयापि पृथिवीत्वजातिसिद्धिः दृष्टाप्रतियोगि
ता संबंधेनाश्रयनाशजन्यरूपनाशप्रतिस्वसमवायिपृथिवीसमवेतत्वस्वव। त्तिरूप
त्वोभयसंबंधेन विलक्षणतेजःसंयोगत्वेन हेतुत्वात् पृथिवीत्वस्य तादृशनाशकताव
च्छेदकसंबंधे घटकत्वात्। आश्रयनाशजन्यरूपनाशेऽपि व्यभिचारवारणाय जन्यांतमा
विशेषणं। घटाग्निसंयोगेन पररूपनाशापत्तिवारणाय समवेतत्वांतस्य नाशकतावच्छे
दकसंबंधे प्रवेशः। तेजोवृत्तिरूपप्रतियोगिता संबंधेन तादृशरूपनाशापत्तिवारणाय तद्घ
टकतया पृथिवीत्वप्रवेशः। स्वसमानाधिकरणरसगंधादौ प्रतियोगिता संबंधेन तादृ
शरूपनाशोत्पत्तिवारणाय स्ववृत्तिरूपत्वस्य नाशकतावच्छेदकसंबंधे [illegible] प्रवेशः। स्ववृत्ति
त्वं च कालिकविशेषणतया बोध्यं। स्वसमवायिसमवेतत्वविशिष्टरूपत्वस्य संबंधत्वे
रूपत्वविशिष्टस्वसमवायिसमवेतत्वमादाय विनिगमनाविरहेण नाशस्य ना[illegible]श ४१॥

कभावद्व्यापत्तेरितितत्वाद्यागः॥ एतेनपाकजगंधेतेजसःकारणत्वेनापाकजेचसु
रभ्यादिगंध्याववयवगतसुरभ्यादेर्नियामकत्वेनगंधत्वेनपृथिवीत्वेनकार्यकारण
भावेमानाभावात्पृथिवीत्वंनजातिरित्यपास्तं॥ ननुगंधवत्त्वस्यपृथिवीलक्षणत्वेपा
षाणादौगंधशून्येऽव्याप्तिरित्याशंकांनिराकुरुते॥ नचेत्यादिना॥ तत्रापि॥ पाषाणादा
वपि॥ पृथिवीत्वेनेतिहेतोः॥ गंधसत्वात्॥ गंधानुमानात्॥ ननुपाषाणादौगंधसत्वेऽनु
पलंभोनस्यादित्यतआह॥ अनुपलब्धिस्त्विति॥ अनुद्भूतत्वेनो अनुद्भूतत्वेन॥
ननुपाषाणस्यपृथिवीत्वएवमानाभावोनितेरांतरदधीनगंधवत्वेऽइसानेस्तत्रपृ
थिवीत्वसाधनायभूमिकामारचयति॥ कथमन्यथेत्यादिना॥ अन्यथापाषाणा
दौपृथिवीत्वानंगीकारे॥ तद्भस्मनिपाषाणभस्मनि॥ यद्यपिपाषाणेपृथिवी
त्वाभावेऽत्यदृश्यत्वादेवतत्रगंध[illegible]त्वलक्षणंनाआ॰त्वमिति॥ अर्थेतत्रगंध

१०

नायपरिश्रमस्तथापिवस्तुगतिमनुरुध्यतथोक्तमितिध्येयं।पाषाणत्वस्यनिगं
धप्रत्यक्षसिद्धत्वेनतत्रपृथिवीत्वमंगीकरणीयं।ततश्चतत्समारंभकावयवेष्वपि
पृथिवीत्वसिद्धिस्तत्रश्चपाषाणारंभकावयवेष्वपिपृथिवीत्वमंगीकरणीयं।तत्समारंभ
कावयवपापाषाणावयवयोरैक्यादेवंचपाषाणस्यापिपृथिवीत्वसिद्धिरित्यभिप्रायः।तद
द्विरास्यति।नसमनोहीति।एतेनपाषाणस्यपृथिवीत्वेऽपिअनुद्भूतगंधापत्तिवारणाय
पाषाणावयवेषुपाकांगीकारआवश्यकः।एवंचपाकोत्पादितगंधवद्भिःपाषाणावयवै
रेवतत्समारंभः।निर्गंधैश्चैतैर्नपाषाणारंभइति।अन्यथातत्समनीसायस्यसंगतिरिति
परास्तातत्थासप्ततस्मैप्रणीतन्यायापाषाणेपृथिवीत्वसिद्ध्याततेनगंधानुमानसंभवादि
ति।पर्यदसमिति।अत्रघटध्वंसप्रसंगेप्रदोषघटोपादानानुपादेयेव्यभिचारवारणायप्रपन्नंद्र
ष्टव्यं।अथवाघटध्वंसस्यअन्यरूपध्वंसेव्यभिचारवारणायतत्।मिथ्याज्ञानध्वंसस्ज ५।

११

ध्येकायद्रहे नवीनमतेदं स्वरूपदं प्रागभावध्वंसजन्ये घटे वा व्यभिचारवारणाय
द्वितीयद्रव्यपदं। प्रतिबंधकअव्यात्वेनाभावजन्ये द्रव्येपि व्यभिचारवारणाय ध्वंसपदं। ध्वंस
त्वेन चेत् जनकत्वं विवक्षितं। तेन प्राचां मते प्रतिबंधकसंसर्गाभावत्वेन तस्य हेतुत्वेपि न
क्षतिः। ध्वंसजन्यत्वं चात्र स्वद्वारा विवक्षितं। तेन शालिग्रामध्वंसजन्ये नारकीयशरीरे
न व्यभिचारः। न च दुग्धध्वंसजन्ये दधि दुग्धावयवजन्यत्वस्वीकारे दध्नोपि दुग्धत्वा
पत्त्या दुग्धावयवैर्दधि न जन्यत इत्यंगीकरणीयं। तथा च दधि व्यभिचार इति वाच्यं।
दध्नो द्व्यणुकातिरिक्तदुग्धध्वंसजन्यत्वास्वीकारात्। द्व्यणुकरूपदुग्धध्वंसज
न्यत्वेपि नस्य न तत्र व्यभिचारः। न उपादानपरमाणुजन्यत्वस्य दधि सत्त्वात् न
च दुग्धपरमाणुजन्यत्वेन दध्नोपि दुग्धत्वापत्तिरिति वाच्यं। दुग्धपरमाणो दुग्धा

लोकावात्द्रव्यत्वव्याप्यमाप्यत्वजातेः परमाणुवृत्तित्वे मानाभावात्। अन्यथा परमाणु
स्वरूपदुग्धे अन्यत्वेन दध्नि दुग्धत्वापत्तिवारणासंभवात्। दुग्धत्वदधित्वयोः परमा
णौ जातिसंकरप्रसंगाच्चेति। व्याप्तिबोधार्थं दृष्टांतमाह दृष्टे [illegible] चेतदिति। मूले नानारूप
वत्वं लक्षणांतरमुक्तं तल्लक्ष्यं प्रतिपादयति। शुक्लेत्यादिना॥ अलक्ष्ये लक्षणासत्त्वं प्रतिपाद
यति। नचेति। रूपवयेति। रूपवयवद्वृत्तिसत्तारूपजातिमति गुणादावतिव्याप्तिवारणाय
द्रव्यत्वव्याप्येति। द्रव्यत्वव्याप्यजलत्वादिमति। जलादावतिव्याप्तिवारणाय रूपवद्वच्छ
नीति। जलपृथिवीअन्यतरत्वादिरूपधर्ममादाय जलादावतिव्याप्तिवारणाय जातीति।
अपेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वादिघटितत्वेन गौरवादाह। स्वनाशेति। अत्रा
पि प्रतिपदमावृत्तिः पूर्ववद्बोध्या। षड्विधस्तु रसस्तत्रेति मूले। चकारः षड्विधत्वं प्रकाशय
ति। मधुरेत्यादिना॥ ननु यत्र नानारसानां समावेशस्तत्राव्याप्तिरित्यत आह। अन्यत्रापीति।

५९।

KKSU LIBRARY
RAMTEK
441 106
M·1550
Dist. Nagpur

107

ननु गंधस्तु द्विविधो मत इत्यनेन द्विविधगंधवत्त्वघटितलक्षणं प्रदर्शितं। तत्राप्युक्तौ।
द्वैविध्यांशस्य वैयर्थ्यादित्यत आह। वस्तुस्थितीति। वस्तुगत्या गंधो द्विविधस्ति-
ष्ठतीति सूचयितुमुक्तं न तु लक्षणे द्वैविध्यस्यापि प्रवेश इत्यर्थः। गंधद्वैविध्यं प्रकाशयति।
द्वैविध्ये चेति। अनुष्णाशीतत्वस्यैव वैयर्थ्यादित्याह स्पर्शश्चेति। पाकजस्पर्शवत्त्वमेवोक्तौ चेदर्थः।
न्यायमते पाकजस्पर्शो मानवति पटे। वैशेषिकमते पाकजस्पर्शस्य परमाणुष्वेव विद्यमान-
त्वात्स्वयविनि मा नासिद्धिमाशंक्य विशेषयति। पृथिव्यामिति। पाकजस्पर्शेति। पदादावि[illegible]सा-
दिपदेन वैशेषिकमतेऽवयविमात्रपरिग्रहः। सत्तारूपजातिमादाय गगनादावतिव्याप्तिवार-
णाय द्रव्यत्वव्याप्येति। द्रव्यत्वसमानाधिकरणसत्तामादायातिव्याप्तिवारणाय यद्व्याप्तिभागः।
स्पर्शसमानाधिकरणजलत्वादिकमादाय जलादावतिव्याप्तिवारणाय पाकजेति। पाकज

१२

द्रवत्वसमानाधिकरणतेजस्त्वमादाय तेजस्यतिव्याप्तिवारणाय स्पर्शीति। जलपृथिव्यन्यतर
त्वादिमादाय जलत्वादावतिव्याप्तिवारणाय जातीति। अत्र च पृथिवीत्वस्य लक्षणतावच्छेदकत्वे त्वाल
क्षणत्वेन संभवतीति तत्परिहारः। वस्तुतस्तु। पृथिवीत्वजातिरपि पृथिव्या लक्षणं। न च व्यतिरेकसह
चारेणान्वयव्याप्तिरेव गृह्यत इत्याचार्यमते पक्षतावच्छेदकस्य न हेतुत्वमिति वाच्यं। हेतुः साध्यस
मानाधिकरणमिति ज्ञानेपि हेतुमान् साध्यवानिति बोधस्यानिष्पन्नत्वेन पक्षतावच्छेदकेपि हेतुसावि
रोधात्। व्यतिरेकव्याप्तेर्गमकतायां तु सुतरां। अणुत्वस्य द्व्यणुकेपि सत्त्वादाह परमाणुरूपेति। बौद्धः शं
कते। ननु अयं घट इत्यादिप्रतीतिरिव नत्र प्रमाणं। भविष्यतीत्यत आह परमाणुपुंजैरेवेति। विलक्ष
संस्थानविशिष्टैः परमाणुभिरेव सर्वोपपत्तेरिति।। अयं घट इत्यादिप्रतीतेरुपपत्तेरिद
ते समूहस्य।। परमाणुसमूहस्य। तत्र दृष्टान्तमाह। यथेति। नत्समूहस्य किन्तु समूहस्य।।
अनुपपत्तेरिति। परमाणूनामनेकत्वादणुत्वाच्चेति भावः।। इतिवदुपपत्तेरिति।। तत्र यथा धा ५२

103

न्यसमवेतस्यैकत्वादेकरूपप्रतीतिः॥ एवं संयोगविशेषस्यैव महत्त्वरूपतया महानितिप्रतीति
स्तथापरमाणुपुंजेष्वपीति भावः॥ प्रत्यक्षत्वादिति॥ यथाच स्वभावतोऽयोग्यानां परमाणू
नां परस्परसंयोगमात्रेण योग्यत्वं न संभवतीति भावः॥ दूरस्थकेशस्तु स्वभावतो नातीं
द्रिय इति लघुत्वेऽपि तस्य वैषम्यमित्याह॥ दूरस्थकेशस्येति॥ तस्यैवेति॥ तस्य दूरस्थकेश
स्य॥ एवकारव्यवच्छेद्यमाह सन्निधानपदेनाचेति॥ तथाच सन्निधानं तदवयवस्य प्रत्यक्षत्वा
दित्यर्थः॥ तथाच दूरत्वस्य प्रतिबंधकत्वात्तद्दशायामप्रत्यक्षत्वं तत्र तस्य न तु स्वाभाविकमप्रत्य
क्षत्वमिति भावः॥ उत्पत्त्यादीति॥ क्षणभंगवादिनां तेषां मते परमाणूनामुत्पत्तिस्वीकारादिति
भावः॥ अन्यथादृश्यस्य दृश्योपादानत्वे तत्र तादृशोद्दहनोपपत्तिस्थले॥ तदंतःपातिभिः॥ अतीत
प्रतैलानःपातिभिः॥ स्वभावात्॥ कारणनैरपेक्ष्यात्॥ स्थूलरूपादीति॥ आदिना लोकादिपरिग्रहः॥
दृत भावे॥ महत्त्वस्थूलरूपाद्यभावे॥ तदभावादिति॥ महत्त्वाभावादित्यर्थः॥ अत्र नास्तिकम

104

५३

त्वानुयायिनः॥ परस्परविभक्तपरमाणूनां महत्त्वाभावादप्रत्यक्षत्वेपि परस्पर संयुक्तानां पुंजा
त्मकानां तेषां प्रत्यक्षे बाधकाभावः॥ न च महत्त्वाभाव एव बाधकः॥ परस्परविलक्षणसंयोगस्यै
व महत्त्वरूपस्य प्रत्यक्षजनकत्वात्॥ न च परमाणूनां नित्यत्वात् घटादावुत्पत्तिनाशयोः प्रतीत्य
नुपपत्तिरिति वाच्यं॥ तन्मते पदार्थमात्रस्यैव क्षणिकत्वेयोपरमाणूनामुत्पत्तिनाशयोः स्वीका
रात्॥ न च परमाणुपुंजेषु घटत्वांगीकारे कपालात् घटस्याइति प्रतीत्यनुपपत्तिः परमाणूनां कपालत्वस्य
स्वाभावादिति वाच्यं॥ तन्मते कपालस्यापि परमाणुपुंजरूपतया घटरूपतत्वा पुंजेषु कपालरूपपुंजत्वस्य
स्य स्वीकारात्॥ पुंजात्मकोहमिति प्रतीतिर्भासि[illegible]तांतादि यार्थस्तत्वं॥ घटइत्यादिप्रतीतिविष
यतः या अनेकपरमाणुषु कल्पने गौरवात्मको घवादतिरिक्तावयविसिद्धेरिति [illegible] दिक्॥ मेरुस
स्यपो र्षपेति॥ यद्योपीति॥ अपि च साम्यप्रसंगइत्युत्तरं संबध्यते॥ तेनच द्व्यणुकस्यसाव
यवारब्धत्वे महत्त्वापत्तिः समुच्चीयते॥ साम्यं॥ परिमाणतारतम्याभावः॥ परिमाणका ५३

105

वेउ

२[illegible]णीकृताया अवयवसंख्यायाः ॥ उभयत्र साम्यादिति भावः ॥ न च मेर्वा[illegible]यवानां सर्ष
पतुल्यपरि[illegible]माणवत्त्वे ॥ ननु सर्षपाणुयवानां सर्षपतुल्यपरिमाणवत्त्वेपि सवयवपरिमाणविशे
षाद्विशेष इति वाच्यं ॥ मे[illegible]र्वयवसर्षपावयवयोरप्यनंतानां यवत्वे न तत्प[illegible]रिमाणतारतम्या
भावस्यापादनीयत्वात् ॥ न च[illegible]मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेषात्त
द्वि[illegible]शेष इति वाच्यं ॥ प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन संख्याविशेषाभावे त
द्विशेषानुपपत्तेरिति ननु तत्रापि विश्रामाश्रयस्य नित्यत्वे मानाभाव इत्यत आह ॥ यत्रेति ॥ अ
समवेतकार्योत्पत्तिप्रसंग इति ॥ असमवेतभावकार्योत्पत्तिप्रसंग इत्यर्थः ॥ ननु तस्य नित्य
त्वासिद्धावप्यणुत्वे किं मानमित्यत आह ॥ महत्परिमाणेति ॥ चाक्षुषद्रव्यत्वादिति ॥ अत्रात्मनि
व्यभिचारवारणाय चाक्षुषपदं ॥ घटाभावे व्यभिचारवारणाय द्रव्यपदं ॥ तदवयवसि[illegible]

दावि ति॥ त्रसरेण्ववयवासिद्धावित्यर्थः॥ जरसिद्धेरिति॥ अवयवधाराया असिद्धेरित्यर्थः॥
अमात्र नव्याः॥ त्रसरेणोरवयवाः सावयवा इत्याद्यनुमानयोरुक्तयोरप्रयोजकत्वेन त्रुटावे
व विश्रामः॥ न चाक्षुषप्रति महत्त्वं कारणं॥ तथा च त्रुटौ महत्त्वमावश्यकं॥ तच्चावयवसंख्याज
न्यमि सवयवं विनानोपपद्यत इत्यनुकूलतर्कसत्त्वान्नाप्रयोजकत्वं त्र्यणुकसाधकानुमानस्ये
ति वाच्यं॥ त्रसरेणुमहत्त्वस्य नित्यत्वस्वीकारेणोक्ततर्कानवतारात्॥ न चाणुव्यवहारस्याणुपरि
माणनिबंधनतया तदाश्रयद्व्यणुकसिद्धिरावश्यकीति वाच्यं॥ तस्यापकृष्टपरिमाणनिबंधनत्वा
त्॥ महत्स्वपि महत्त्वमादणुव्यवहारात्॥ न चैवं त्रसरेणुपुंजस्यावयवीति वाच्यं॥ विशाक
लितेष्वपि तेषु घट इत्यादिप्रत्ययप्रसंगात्॥ न च तत्संयोग एव घटः स च द्रव्यमित्यादिप्र
तीतौ च परंपरयात्तत्वो न मिश्रमिति वाच्यं॥ सं पवव[illegible]तिसाक्षात्संबंधविषयत्वे परंपरासंबंधो
विषयत्वकल्पने गौरवादित्याहुः॥ ननु परमाणुत्रयेण कुतो न द्रव्यांतरोत्पत्तिः॥ परमाणुद्वयेन ५४

द्व्यणुकवंदेवं द्व्यणुकद्वयेन द्रव्यान्तरोत्पत्तिस्त्रि द्व्यणुके त्र्यणुकवदिति चेन्न ।। प्रमाणाभावे
न तादृशद्रव्यासिद्धेः परमाणुद्वये द्व्यणुकद्वये च द्रव्यारंभकसंयोगाकल्पनात् ।। अत्रेदं चिंत्यं ।।
त्रिभिः परमाणुभिरेव त्र्यणु[illegible]कमस्तु परमाणुभ्यामनारंभकमस्तु [illegible]विसिवालिनां द्व्यणुकाभ्यु
पगमनादिकल्पने मानाभावात् ।। फलबलेन त्र्याणामेव युगपद्द्रव्यारंभकसंयोगकल्पनात् ।।
वस्तुतो[illegible]नवाधारं थोद्धस्य मानानां द्व्यणुकत्वमेव युक्तं परमाणुद्वयारब्धत्वे लाघवादिति ।।
मूले स्वेदजस्येद्र्गामिंद्रियं विषयस्त्वेवयस्य त्रैविध्ये हेतुपरत्वं संसूचयितुं सर्वमाह ।। सोका मद्भिजो
यस्येति ।। योनिजं ।। शुक्रशो[illegible]णितपरस्परमेलनेनजन्यं ।। जरायुजमिति ।। गर्भवेष्टनचर्म म८ योनि
पुटकं जरायुः ।। मानुषादीनामित्यादिना पशुमृगाणां परिग्रहः ।। सर्पादीनामित्यादिना विहगप ४ डां ।
रिग्रहः ।। स्वेदजमुदाहरति ।। भूमिंदृशा घाइति ।। जघशरीराणामुत्पत्तेरधर्मविशेषसाहित्येभ्यो
णुक्य एव स्वीकारादिति भावः ।। उद्भिज्जादिकं[illegible] सादिनादेवादिशरीरपरिग्रहः ।। जघशरीराणां
मि १

१०८

५ मुत्पत्तेर्धर्मविशेषवशसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः॥ तेषां मायोनिजत्वे चागमप्र
वक्ष्यमाणो मानसामग्र्यादयः॥ पुत्राद्युत्पादि प्रमाणं॥ योनिविनाभूत शरीरमित्येव विधा [illegible] गमे
चेष्टापदं कारणमात्रपरं॥ शरीरपदं वा मनुष्यदेहपरं॥ गंधादिमत्त्वादिनाऽनुक्तेतर [illegible] पपरिग्र
हः॥ क्लेदोष्मादितीत्यादिना व्यवहारकाणापरिग्रहः॥ क्लेदः द्रवणं॥ स्वेदजमिति यावत्॥ उष्मापा
कः॥ औष्ण्यमिति यावत्॥ तच्छरीरसंबंधेन पुष्पादौ रूपादिपरावर्तनानुमीयते॥ अनु
च्छानानुसृतेः॥ स्फूर्तः॥ क्रिया॥ अवकाशो मुखादावन्नादिगमप्रतिबंधः॥ ननु वक्ष्यति हि
शरीरं पांचभौतिकत्वमेव हारद्युत आह॥ तेनेति॥ शरीरस्य पार्थिवत्वसाधनेनेत्यर्थः॥ एवं च
शरीरं पांचभौतिकं त्र्यवलारोन पंचभूतोपादानकं तत्संबंधनः किंतु पंचभूतजन्यत्वानि
बंधनस्तत्राप्येकैकस्योपादानत्वं चतुर्णां निमित्तत्वमिति विवेकः॥ किंतु चेष्टेति॥ चेष्टावत्त्वं जा
तिविशेषश्चेष्टत्वइति प्रसक्तसिद्धः॥ न च शरीरत्वमेव पृथिवीत्वादिव्याप्या जातिश्चेष्टावत्त्वं चेत् ५५

१०९

त्रियात्वमिति वाच्यं॥ पृथिवीत्वादिना संकरेण पृथिवीत्वादि[illegible]व्याप्यानेकशरीरत्वकल्पने
गौरवात्॥ आध्यात्मिकेति॥ आध्यात्मिकवायुः प्राणाख्यः॥ शंकते॥ तत्रैवेति॥ भग्नक्षतेति॥ भग्न
क्षतयोर्विभागविशेषविशिष्टावयवयोः संरोहणं॥ आदिना वृद्धिसंग्रहः॥ वृद्धिश्चावयवो
पचयः॥ तदुन्नयनादिति॥ आध्यात्मिकवायुसंबंधानुमितेः॥ ननु भग्नक्षतसंरोहणादि
हेतुवायोः प्राणत्वमानाभावादिति चेन्न नर्मदातीरसंजाताः सरलार्जुनपादपाः॥ नर्मदातोयसंस्प
र्शात्ते यांति परमां गतिं॥ गुरुंत्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः॥ स्मशाने जायते वृक्षः कंकगृध्रो
पसेवितः॥ आगमस्यैव तत्र मानत्वात्॥ अंशावयवित्वेनेति॥ द्व्यणुकारंभकद्व्यणुत्वेन स नो
र्वेः॥ मृतशरीरे चेष्टाया अभावेनाव्याप्तेरत आह॥ अथवेति॥ घटत्वमादाय घटेति व्या
प्तिवारणाय चेष्टावदिति॥ हस्तत्वादिव्याप्तिवारणायांत्यावयवीति॥ न च हस्तत्वादिकं
न जातिः पृथिवीत्वादिना संकरादिति वाच्यं॥ पृथिवीत्वादिव्याप्यनानाहस्तत्वां

110

२

ग्रीकारात्॥ पृथिवीत्वरूपताद्दशजातिमत्त्वं घटादावतिव्याप्तेर्लक्षणांतरमाह॥ अंत्यावयवी
ति॥ अंत्यावयविमात्रवृत्तीत्यनेन द्रव्यत्वजातिव्युदासः॥ चेष्टावद्वृत्तीत्यनेन घटत्वादिव्युदा
सः॥ चेष्टा च हिताहितप्राप्तिपरिहारार्थक्रिया ग्राह्या॥ ननु स्पंदनमात्रं॥ घटादावपि संचा
त्॥ ननु देवत्वादिरूपजातिमादाय लक्षणसमन्वयः संभवत्यत आह॥ जातीयेति॥ देवत्वस्यापीति
अपि ना नरसिंहत्वपरिग्रहः॥ जातित्वाभावादिति॥ जातिसांकर्यादिति भावः॥ जातिसांक
र्यस्यादोषत्वे देवत्वस्य शरीरत्वादिना जातित्वांगीकारे वा देवत्वे च शरीरत्वजातिमादाये
व लक्षणसमन्वय इति ध्येयं॥ रूपादिमध्य इति॥ रसगंधस्पर्शा आदिपदार्थाः॥ ननु शब्दावे
धकं जले मनसि च व्यभिचारवारणायैवकारः॥ नहीने च संस्कारस्याप्यभिव्यंजक
त्वान्न दोषः॥ घ्राणेंद्रिये गंधस्याभिव्यंजकत्वाद्धेतोरसिद्धिवारणाय हेतौ मध्ये ज्ञानं॥
ने चासिद्धिवारकं विशेषणं निरर्थकमिति वाच्यं॥ व्यभिचारज्ञानइव हेत्वप्र

ऽसिद्धावपि आप्तिलानाभावेन आप्तियौपाधिकाप्रसिद्धिवारकविशेषणोपादानस्य सर्वासि
द्ध्यात्या।।तदर्थत्वात्।।हेतुवाक्यघटकमध्यांतपदसमभिव्याहृतेनैवकारार्थत्वात्।।तत्पाचद्र
ष्टांते स्वीयरूपादिमज्जलके घटनादावसिद्धिवारणाय परकीयत्वरूपाद्यो विशेषणं देयमिति भा
तस्येति।।नवशरावगंधव्यंजकजलेस्य सर्वैः।।नच नवशरावे गंधव्यंजकजलेन येन सक्तु
रसो नाभिव्यंजितस्तत्र जलविशेषेऽनैकांतिक इति वाच्यं।।परकीयरूपादिविषयकसाक्षा अं६
त्कारस्वरूपयोग्यत्वस्य विवक्षितत्वात्।।नवशरावगंधव्यंजकजलेपि रसव्यंजकतावच्छे
दके जलेत्वस्य सत्वादिति।।परकीयेति विशेषणाप्रवेशेन लाघवादाह।।यद्वेति।।तद
दाने हेतुमाह।।वायवीनेति।।इदमत्र बोध्यं।।रूपाद्यव्यंजकत्वे सतीत्वस्य हेतुत्वेन तद
यं।।शब्दाद्यव्यंजकत्वे सति गंधव्यंजकत्वस्य नवशरावगंधव्यंजकोदके व्यभिचारे
ण तत्र गंधव्यंजकत्वे सामर्थ्याभावात्।। तत्र [illegible] हेतुपुरस्सरस्पर्शानां परकीयत्वं विशे

112

D

पपयणं ॥ न च प्रथमे हेतौ ननु शरावगंधसंज्ञके ~~के~~ ऽतोऽभिचारः ॥ ननु ताद्रूप्यम बीनी·
नेरूपं संज्ञकस्यात् ॥ न च तृतीये हेतौ तत्र अभिचारः ॥ एतद्रसरसेनापि यद्वेतिविक
ल्पांतरप्रणयनात् ॥ तत्रापि परकीयत्वविशेषणाऽव्यरिते हेतुत्रयमिति ॥ तत्र ॥ घ्रा
णेंद्रियसंनिकर्षो ॥ इंद्रियत्वं न जातिस्तेजस्त्वादिना संकरात् ॥ किंतु शब्देतरोद्भूतेसा
दिनावश्यमाणं बोध्यं ॥ ननु विषयत्वं न जातिः सामान्यादौ सत्त्वात् तल्लक्षणमा
हात् ॥ उपयोगेति ॥ यद्यपि साक्षात्कारोगसाधनत्वं द्वणुकादावप्यास्तं साक्षात्कारस्यासा
धारणत्वं साधनत्वं परमाणावपीति द्वणुकादिग्रहणं गतमिति ~~तिम~~ पविरोधस्त

थापि साक्षात्परंपरासाधारणप्रयोगसाधनत्वं विवक्षितं ॥ परमाणुरूपविषयएव ॥
कार्यरूपपृथ्वि आप्यवत्त्रिप्रकारेण विभज्यना कार्यपार्थिवीविषयएव द्व्यणुकेत्या
दिनाप्रदर्शितमितिन ग्रंथविरोधः ॥ अतएवोक्तं तदुपयोगसाक्षात्परंपरयाते
नत्र नसूत्रेवेति ॥ कार्यजातिमित्यत्रजातपदं संपातायातं ॥ अदृष्टाधीनमिति ॥ अ
त्रचकार्यमात्रं प्रत्यदृष्टस्य हेतुतानसमवायसंबंधेन ॥ घटाद्यधिकरण
कपालादौसमवायेनतदभावाद्व्यभिचारात् ॥ यत्तु ॥ स्वसमवायिसं
योगेनादृष्टं कार्यमात्रे हेतुरिति ॥ तन्न ॥ शब्दरूपकार्याधिकरणेगगनेऽदृष्ट

समा। वाय्यात्मसंयोगाभावेन व्यभिचारात्॥ परं तु स्वसमवायिसंयुक्तसंयोगेन तत्
स्य हेतुता बोध्या। इदं तु बोध्यं॥ अदृष्टस्य कार्यमात्रं प्रति हेतुता न साध्यात्॥ न हि सा
मग्रीसमवधानेऽदृष्टविलंबेन कार्यविलंबो दृष्टो येन न साक्षाद्धेतुः स्यात् परं तु साम
ग्रीसंपादकतया प्रायः परंपरैव तदुपयोगः॥ केचित्तु मेघसंचारादौ साक्षादेव तद्धेतु
रन्यथा सामग्रीसंपादकत्वस्यैवानुपपत्तेरिति। एतदर्थमेव साक्षात्परंपरासाधा
रणजन्यत्वबोधकमधीनपदमुपात्तं॥ यददृष्टाधीनं॥ यत्पुरुषीयादृष्टाधीनं॥ तत्॥
तत्कार्यमित्यर्थः॥ तदुपभोगसाधनं तत्पुरुषस्योपभोगसाधनं॥ तेन॥ द्व्यणु
कादिकार्यस्य न तत्पुरुषोपभोगसाधनत्वेन॥ नन्वेवं सर्वस्यैव विषयत्वेन रा

रीन्द्रियविषयभेदेन पृथि[illegible] आस्तां विध्यं न सिध्येदत आह ॥ नुरीन्द्रियेति ॥
॥ इति पृथिवीग्रंथः ॥ ॥ॐ जलत्वे जातौ प्रमाणमाह ॥ स्नेहेति ॥ कारणतावच्छेदकत
या धर्मसिद्धौ बाधकाभावात्तस्य च जातित्वमिति भावः ॥ निरूढवृत्तिधर्मस्य का
र्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वेन संभवतीति शंकेतेय
द्यपीति ॥ तथा ॥ कार्यतावच्छेदके ॥ वस्तुतस्तु ॥ निरसाधारणधर्मस्य कार्यतावच्छे
दकत्वे दोषाभावात् अन्यपदं नैरर्थ्यमेव ॥ ननु यथारण्यस्थकंदगदोफला[illegible]
नुपधायके कारणतावच्छेदकत्वादंडत्वादिके जातिस्तथात्रापि स विपर्यलीस
ने आह ॥ तस्येति ॥ दंडादेः स्वरूपयोग्यतायां न कापि क्षतिः ॥ तस्य निसत्वेन

116

१२

फलोपधायकत्वाभावादिति भावः ॥ जन्यजलत्वजातेः ॥ जन्य- जलमात्र
वृत्तिजातेः ॥ तदवच्छिन्नेति ॥ जन्यजले सत्तासवच्छिन्ने इत्यर्थः ॥ न चैवं जलीयसा
वयविनि जलत्वं न स्यादिति वाच्यं ॥ जलस्यासावयवस्यानुपगमात् ॥ ननु जलत्वा
वच्छिन्नं प्रति समवायसंबन्धेन जलस्यैव कारणत्वमस्त्वतिरिक्तजातिक
ल्पनापेक्षया लाघवादिति चेन्न ॥ जलत्वावच्छिन्नं प्रति स्नेहत्वेन वा कारण
त्वे शीतस्पर्शेनैव तत्र विनिगमनाविरहादतिरिक्तजातिसिद्धेः कृतमादा
यत्वाल्पनीयेन विनिगमनाविरहाभावादिति ॥ केचित्तु घटमादिकंपसा ५९।

117

ईंधनादेः कारणत्वं निर्विवादं ॥ आर्द्रत्वं च जलसंयुक्तत्वं ॥ तथा च जलसंयुक्तें
धनत्वेनें धनसंयुक्तजलत्वेन वा कारणत्वे सत्र विनिगमनाविरहात् ज्ञानें धनयोः
पार्थक्येन कारणतावच्छेदकतया जलत्वजातिसिद्धिरित्यप्याहुः ॥ परे तु ॥ स्थूलजल
वृत्तिप्रसक्षासिद्धजलत्वरूपजात्यावच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसा
धारणजातिसिद्धिः ॥ कार्यतावच्छेदककारणतावच्छेदकयोरैक्यस्य स्वाभावि
त्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावाच्चेत्याहुः ॥ नत्वि तारखिष्या
दावतिव्याप्तेरिति दोषः ॥ शुक्लरूपस्य लक्षणत्वेपि न क्षतिरिति सम्मित्रे स आ ॥ अतएवेति ॥
रेमलत्वमाप्यनानुरूपजातिमादाय वा यावतिप्रसंगात्यारूपवद्वृत्तीति ॥ यथा चवायुत्वं

118

६०

जातिस्तथाग्रेवक्ष्यते।। पृथिवीत्वादिजातिमादायपृथिव्यादावतिप्रसंगावारणाय नैमि
त्तिकद्रवत्ववद्वृत्तीति।। साक्षादिति परत्वादिवारणाय।। द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्व
व्याप्यव्याप्यत्वमात्रे न तु द्रव्यत्वव्याप्यत्वस्यापि तत्रांतर्भावः।। रूपवद्वृत्तित्वविशेषणेनैव
रूपत्वादीनां वारणाय तन्निवेशे प्रयोजनाभावात्।। यद्यप्यवस्योपस्थितिवद्द्रव्यत्व
स्यैव रूपस्य ध्याने प्रवेशो युक्तः तेनापि वायुत्वादेर्वारणात्।। एवं च द्रव्यत्ववद्वृत्तित्वा
भावादेव घटत्वादीनां वारणसंभवे द्रव्यत्वसाक्षाद्व्याप्ये सपिनद्धेयमितिहि लाघवं त
थापि स्त्रेवर्णाः शुक्लेतरत्वादिनारूपघटितलक्षणस्यैवोक्तत्वात्तद्घटितलक्षणपरि
ष्कारे मूले विशेषः स्यादिति तत्त्यागेनकृतमिति ध्येयं।। मूले [illegible] त्वं ज्ञासन प्युपगमे

६०

रूर

नचेदं तेन जलत्वस्य अस[illegible]त्वेऽव्याप्यवृत्तित्वमाप्यत्वेपि जलस्मृतिः॥ जलघटान्तरत्वमा
दायघटादावतिव्याप्तिवारणाय जातीति॥ क्वचिच्छुक्ल[illegible]पव[illegible]वृत्तीति पाठस्तत्र शुक्ल
पदं रूपपदं संपातायातं॥ एवमेव च[illegible]रभास्वरशुक्लेतररूपे सत्र रूपवद्वृत्तिद्रव्य
त्वसाक्षाद्व्याप्यपदयोर्बोध्या॥ पृथि[illegible]विसमादाय पृथिव्यामतिव्याप्तिवारणायाभा
स्वरशुक्लेतररूपासामानाधिकरणेति॥ जलत्वस्य शुक्लरूपसामानाधिकरण्यात् सं
भवमिति तद्वारणाय शुक्लेतरेति॥ तेजस्त्वमादाय तेजस्यतिव्याप्तिवारणाय अभास्वरेति॥
शीतस्पर्शेति॥ यद्यपि शीतत्वं गुणे को[illegible]क्लीबत्वेनोचिता॥ तथापि विशेष्यस्पर्शशब्दस्य पुंलिं
६० गत्वात् पुंलिंगतया निर्देशः॥ शुक्लरूपमित्यादौ शुक्लपदस्य क्लीबतयैवेति॥ द्रमत्वा

120

६१ पर्याप्तिनीलत्वरूपजातिस्तामादायपृथिव्यामतिव्याप्तिवारणायेति त्कारस्ति॥ लिङ्गस्यादि
जातिमादायेतजादावतिव्याप्तिमादायमधुरत्व॥तीति॥ शेषंदर्शितदिशावसेयं॥ ननु ज
ले नीलरूपाभावे कथं नीलप्रतीतिरत आह॥ कालिंदीति॥ स्वसमवायिसंयोगसंबंधेन
उपष्टंभकपार्थिवभागगतनीलरूपप्रतीतिः कालिंदीजलादाविति भावः॥ अत एवेति॥ उप
दर्शितसंबंधस्य जलकं नीलमिति प्रतीतिनियामकत्वादेवेत्यर्थः॥ वियतीति॥ तदोप
दर्शितसंबंधघटकसंयोगस्य नाशादिति भावः॥ तत्र॥ जले॥ तस्य॥ माधुर्यस्य॥ आ
स्यथा॥ आश्रयौपाधिकस्याभावे॥ अंबुकस्यादित्युत्तरं॥ हरीतकीभक्षणोत्तरं प्रस
क्षेण माधुर्योपलंभादितिप्रणीयं॥ कल्पनागौरवादिति॥ अवयवरसाऽन्यस्य ६१

पृथिवीरसस्याग्निसंयोगसाध्यत्वदर्शनात् तदनुरोधमात्रेण जलसंयोगस्यापि पृथिवीरसोत्पादकत्वस्वीकारे अतिरिक्तकार्यकारणभावस्य हरीतक्यां मधुररसस्य चकल्पने गौरवादिति भावः॥ नन्वस्तु जले मधुरो रसः॥ तथापि पृथिवीरसजातौ दृष्टौत्र सप्रसिद्धस्याम्लरसस्यापि स्वीकारे बाधकाभावस्तत आह॥ पृथिवीत्वस्येति॥ आम्लादिजनकतावच्छेदकत्वादिति॥ यद्यपि पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्ववन्मधुरजनकतावच्छेदकत्वमप्यस्तीति तुल्यं॥ तथापि हरीतकीभक्षणोत्तरं जलेपि मधुरोपलब्धेस्तत्र मधुरस्वीकारस्यावश्यकत्वाज्जलत्वेनापि मधुरं प्रति हेतुत्वं कल्प्यत इति भावः॥ ननु जंबीरसलिलादावम्लप्रसक्त्या जलत्वेनाम्ला

रिरसोपितुल्यवेधतुलंस्यात्तत्राह ॥ जंबीररसस्रावति ॥ समवायिसंयोगेन जंबीरगता
म्लादिरसप्रतीतिस्तद्वत्जलस्यार्थः ॥ शुष्केपिजंबीरे अम्लप्रतीतिस्तत्राम्लस्वभावस्यात्केवल
स्येनतन[illegible]द्वत्जलेपरपरस्याप्रतीतिः ॥ [illegible] हरीतक्यांतुमधुररसस्यास्वादानंतरहरीतकीगत
माधुर्यस्यजलेप्रतीतिरितिभावः ॥ कर्कटीफलभक्षणोत्तरं जलपानेतिक्तरसस्यानुभावात्तिक्त
रसस्यजलेस्यादितिचेन्न ॥ जलपानात्पूर्वंभक्षितकर्कटीफलजतिक्तरसोपलब्धेः कर्कटीभक्षणेन
रसनाग्रवर्तिपित्तोद्भेतदीयतिक्तोपलब्धेर्वैद्यकसिद्धत्वाच्च ॥ गयस्थतोनिर्झरेघपीतनिर्मल
गंगाजलमाधुर्यस्यानुभावसिद्धस्यापलापासंभावेनमधुर[illegible]त्वेनिरस्तः ॥ एतेन
हरीतक्यादौनिजजलसंयोगेनमाधुर्यमुत्पद्यतेयेनकल्पनागौरवं ॥ पुरःहरीतक्यांका
पायवन्मधुररसोपिस्वीक्रियते ॥ नचजलेकस्वजलकसंयोगः ॥ नतुतद्वन्नरसांतर

६५

स्यफलबलात्॥ यदि च चित्ररूपवच्चित्ररसमानानाभावाद्गुण निरोधेन नीरसैव हरीतकी
रस्य प्रतीतिस्तु अवयवेषु रससत्वात्सारंपरयेत्युच्यते॥ तदास्तु जलसंयोगो हरी
तक्यावयवगतमाधुर्यस्यैव अंजकरसपास्तं॥ जलस्या॰ज्ञातावनुमानांतरं प्र
माणमाह॥ एवमिति॥ ननु जलत्वाभावे घटचंदनादौ शै॰सोपलब्धेर्व्यभिचारेण कथं
जलस्य जलत्वेन तत्र हेतुत्वमत आह॥ घटेति॥ एवं शीत एव स्पर्शहेतुत्वं तत्साधयति॥
तेजःसंयोगादिति॥ तत्र जले॥ विवेचयिष्यति च पाकासंभवमुपरिष्टात्॥ घनतादाविसारि
पदेन तैलादिपरिग्रहः॥ जलत्वस्यैव स्नेहतरसनंतरं स्वाश्रयसंयोगेन प्रतीयत इति शे
षः॥ तेन घृतादौ समवायेन स्नेहनिरासेन॥ जल एवेति॥ स्नेहस्यावांतरविशेषात्॥

वात्सनोत्कीर्त्तिः॥ तदवच्छिन्नजनकतावच्छेदकं तत्त्वं॥ जन्यजलत्वमेव तदवच्छिन्न
जनकतावच्छेदकं जलत्वमिति भावः॥ अथैवं रीत्या परमाणुप्रावृत्तमाद्यणुककं ज
लत्वमेकं परमाणुसाधारणं द्वितीयमिति जलत्वयोर्द्वैविध्ये दागतः कुतः इति चेत् सम
नियतयोग्यव्यक्तिरभिसादिति॥ एवमग्रेऽपि॥ तैलादावित्यादिपदेन क्षीरपरिग्रहो नानु
घृतस्य तत्र नैमित्तिकद्रवत्वस्य सम्भवाच्चेन्नैव सत्त्वात्॥ द्रवत्वमित्यनंतरं स्वाश्रय
संयोगेन प्रतीयत इति शेषः॥ ननु तैले जलसत्त्वे तैलस्य दहनानुकूल्यं न स्यात्॥ जलस्य
दहनप्रतिकूलत्वादत आह॥ स्नेहप्रकर्षेणेति॥ प्रकृष्टस्नेह[illegible]स्य जलस्य दहना
नुकूल्यमेव॥ अपकृष्टस्नेहस्यैव जल[illegible]स्य दहनप्रतिकूलत्वादिति भावः॥ रतिवस्य

नेइति॥ स्नेहनिरूपणावसर इति शेषः॥ अयमवदिति॥ षष्ठीसमर्थाद्वतिरित्यभिप्रायेणाह॥
पृथिव्यादाविव स्पर्श इति॥ एवमग्न्येपि॥ जलीयं शरीरमिति॥ जलस्य पार्थिवावयवैरुपष्टंभाद्बोध्यं॥
तेन जलमात्रे हस्तपादादिव्यवस्थाया असंभवेपि न क्षतिः॥ ननु तादृशशरीरे प्रमाणाभावोऽ
नुपलंभादित्यत आह॥ वरुणलोक इति॥ तत्र श्रुतिरेव प्रमाणमिति भावः॥ गंधेति॥ रसाव्यं
जके मनसि व्यभिचारवारणाय गंधाव्यंजकस्येति॥ कासारः सरः॥ करकादित्यादिप
दात् कूपादिपरिग्रहः॥ कठिणत्वादिति॥ कठिणस्पर्शवत्वादित्यर्थः॥ वि[illegible]लीनस्य
तस्येति॥ सत्वस्पर्शे षष्ठी॥ केचित्तु विलीनयोस्तयोरिति पाठः॥ स तु ऋजुरेव॥ विलीन
तायाः द्रवत्वरूपायाः जलत्वव्यंजकत्वादिति भावः॥ ननु विलीनतानैमित्तिकंद्र

126

४

वेत्वमेव ॥ अनुत्कटमूष्मणेति ॥ तच्चेन जलत्वमद्रवकं ॥ यदि च विलीनेन तस्मिन्निति सत्यमस्मि
न्नेष सती स्पर्शस्तदापि करकादिनाशोत्तरं द्रवमात्रसेत्स्यात् तन्नैव द्रवत्वत्वजलत्वयोः
प्रसक्षसनकरकायां नष्टत्वादत आह नयद्रूपमिति ॥ तथा च करकादिनाशोत्तरमु-
त्तरे जलत्वस्य प्रत्यक्षसिद्धत्वात् उक्तस्याकरकादिषु द्रवत्वसिद्धिरिति भावः ॥
ननु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्यय इत आह ॥ अदृष्टविशेषे-
णेति ॥ ॥ इति जलग्रन्थः ॥ ॥ उष्णं चेति ॥ उष्णत्वजातिसिद्धौ चेत्यर्थः ॥ ननु कथं त-
हि जन्यो [illegible] उष्णस्पर्शसमवायिकारणं किं तेषु परमाणुषु तेजस्त्वजातिसिद्धिरि-
सत आह ॥ तस्येति ॥ तेजस उष्णस्य स्पर्शः ॥ जलत्वस्येवेति ॥ यथा च जन्यजलत्वावच्छि- ६४

न्नजनकतावछेदकतया जलपरमाणौ जलत्वजातिसिद्धिस्तथा जन्यतेजस्त्वावच्छिन्नजन
कतावछेदकतया तेजःपरमाणावपि तेज[illegible] स्वरूपजातिसिद्धिरित्यर्थः॥ इदमुपलक्षणं॥
समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वे
तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यं॥ चंद्रकिरणादावित्यादिना रत्नकिर
देः संग्रहः॥ तत्रापि चंद्रकिरणादावपि॥ ननु तत्र शैत्यप्रतीतिः कुतो नेत्यत आह॥ किंत्विति॥
तदंतःपातिजलस्पर्शेनेति॥ चंद्रकिरणांतर्गतजलभागशीतस्पर्शेनेत्यर्थः॥ ननु चक्षुरादिनि
ष्ठस्योष्णस्पर्शस्य केनाप्यनभिभूतत्वात्तस्य स[illegible]पलब्धिरत आह॥ चक्षुरादौ चेति॥ म
रकतकिरणादावित्यादिना सुवर्णस्य परिग्रहः॥ स्याद्रूपं शुक्लभास्वरमिति मूलं तत्र शुक्ले

128

८५

ति स्वरूपकथनं भास्वररूपमात्रस्य लक्षणत्वेऽतिप्रसंगाभावात्॥ भास्वरत्वं जातिवि
शेषः सूच्यते जोरूपमात्रवृत्तिः॥ शुक्लं चाप्यस्येति॥ ननु रूपाविषयकद्रव्यप्रत्यक्षस्याभा
वात्॥ वैश्वानरादेश्चाक्षुषस्यानापत्तिरिति शंकते तेन [illegible]रूपाग्रहादिति॥ वैश्वानरादेश्चाक्षु
षत्वेनेष्टत्वात्। तत्संख्यादिगुणानामपि चाक्षुषत्वं न स्यात्॥ योग्यमात्रवृत्तित्वाभावादित्य
पि नास्तीचित्॥ अन्यदीयरूपेणैवेति॥ पार्थिवरूपेणैवेत्यर्थः॥ मतांतरमाह॥ वन्हेरिति॥ सु
वर्णादिरूपे तेजसि सत्त्वादिति॥ तेन नानासंभवदिति भावः॥ पृथिव्यवृत्तीति॥ नैमित्तिक
द्रवत्ववद्वृत्तिः अत्र च रूपजातिमादाय पृथिव्यादावतिव्याप्तिवारणाय पृथिव्यवृत्ती
ति॥ पृथिव्यवृत्तिना शुक्लत्वादिमादाय वाय्वादावतिव्याप्तिवारणाय नैमित्तिक

८५

129

ऽवल्ववहृतीति॥ वायुतेजोन्यतरत्त्वमादाय वायावतिव्याप्तिवारणाय जातीति॥ परकी
यस्य स्पर्शादिति गंधाद्यंतकत्वादिघटितेति हेतोनरस्तु चनायादिपदेन गंधादिपरिग्रहः॥ च
क्षुषः परकीयरूपादिग्राहकत्वादसिद्धिवारणाय स्पर्शपरं॥ इह केचिदाहुः॥ चक्षुर्वि
षयासंबद्धमेव ग्राहकं॥ यदि प्राप्यकारि स्यात्तदा रसनादिवदधिष्ठानसंबद्धं गृह्णी
यात्॥ न चैवं॥ गोलकासंबद्धग्रहणात्॥ किं च यदि चक्षुः प्राप्यकारि स्यात्तदाधी
कपरिमाणं न गृ[illegible]ह्णीयात्॥ न खलु नखवर्तिनि कापरस्य घटाद्यधिकमाति॥ शाखा
चंद्रमसोस्तुल्यकालग्रहणानापत्तिश्च॥ गतिक्रमेण प्राप्यग्रहणे क्रमेण ग्रहणं स्यात्॥
न[illegible]नु तुल्यकालमुपलंभः॥ अनुभवति ह्युन्मीलयन्नेव नयने शाखां शीतमयूखं च॥

एवं च प्राप्यकारित्वानुरोधेन गोलकातिरिक्तं चक्षुः परैरङ्गीक्रियते ॥ गोलकस्य चंद्रादिप्राप्त्य-
संभवात् ॥ अप्राप्यकारित्वे च गोलकमेव च चक्षुरस्त्वेनैते ल्लसमिति [illegible] नास्य सातु ॥ अ-
धिष्ठानासंबद्धार्थग्राहिण्याः प्रदीपप्रभाया इव च चक्षुषोपि प्राप्यकारित्वसंभवात् ॥ अपि तु
ग्रहणस्य च गोलकनिर्गतस्य महतश्चक्षुषः एव ग्राहकत्वेन प्रदीपप्रभाया इवोपपत्तेः ॥ स्वा-
[illegible]धिकपरिमाणवद्ग्रहणग्राहिणा त्वगिन्द्रियेण व्यभिचारात्सादृश्यनियमाभावाच्च तुल्य-
॥६६॥ कालं ग्रहणं चास्मिन्नेव नदृश्यमानस्य कालसंनिकर्षेणैवोपपत्तेः ॥ अपि च सौरतेज ॥६६॥
सोलोच्च बालिरूपेणवेगातिशयो यथा प्राचीनाचलचूडावलम्बिन्येव भगवति मयू-
खमालिनि भावनोदरे ष्वालोकः सप्रिमतो लौकिकानां ॥ यथाहुः शालिकाचार्याः ॥

चक्षुर्वाह्यालोकाभ्यामारब्धेन चक्षुषा तावदर्थसंसृष्टेन[illegible]युगपत्तावदर्थग्रहणमिति शा
खाचंद्रमसोस्तुल्यकालग्रहणानुपपत्त्यापत्त्येवेति॥ तन्नभसौमतं॥ चक्षुर्वाह्यालोकाभ्यामा
ब्धस्य चक्षुषः पृष्ठभागेपि सत्त्वात्पृष्ठभागस्थितपदार्थग्रहणापत्तेः॥ पृष्ठदेशस्थबौबा
ह्यालोकैश्चक्षुरुत्पादमानाभावादितिचेत्तत्रदेशस्थबाह्यालोकैरपि चक्षुरुत्पादमानाभावः॥
तदनभ्युपगमेपि चाक्षुषोपपादनस्यानुपदमुक्तत्वादिति॥ लोचनादाह॥ अथवेति॥ ते
तैजसत्वे किंमानमिति॥ सुवर्णं॥ पार्थिवं॥ नैमित्तिकद्रवत्वादिसत्त्वानुमानस्य पार्थिवत्वसाध
कस्यैव सत्त्वादिसासः॥ [illegible]प्पाद्यत्तेजेति॥ सुवर्णमिति॥ न चात्र पीतरूपवत्द्रव्यात्मक
स्य सुवर्णस्य पक्षत्वे बाधः॥ तैजससुवर्णपक्षस्य चानुमानात्सुवमसिध्यापक्षाप्रसिद्धिः॥

राम

धर्मितास्तोऽपि सुवर्णपदप्रयोगेन तस्यापि सुवर्णपदवाच्यत्तया सुवर्णपदवाच्यत्वस्य पक्ष
तावच्छेदकत्वेऽपि बाधतादवस्थ्यादिति वाच्यं॥ अ संतानत्व त्व संयोगानुच्छेद्यद्रव्यत्वाधि
करणत्वस्यैव पक्षतावच्छेदकत्वात्॥ अनवच्छेदकावच्छेदेन साध्यसिद्धिरूपस्य तेन
च पक्षतावच्छेदकत्वे तत्परप्रयुक्तस्य सामानाधिकरण्येन सिद्धसाधनस्यादोष
२६७॥ सात्॥ असत्प्रतिबंधकइति॥ जलमध्यस्थ[illegible]क्ष्यमाणघटादौ व्यभिचार ॥६७॥
णायासत्प्रतिप्रतिबंधकइति॥ अग्निसंयोगानास्यद्रव्यत्ववति घटादौ व्यभिचा
रवारणाय संयोगइत्युक्तं॥ तादृशद्रव्यत्वस्य समानाधिकरणाग्निसंयो
गासमानकालीनत्वान्न व्यभिचारः॥ अनुच्छिद्यमानद्रव्यत्वादिसस्यानुच्छिद्य

मानद्रवत्वाधिकरणत्वादिसर्पीनत्वधिद्यमानद्रवत्वानधिकरणत्वादिति॥
गनाशेव्यभिचारात्॥ पूर्वपक्षिणाशंकितामप्रयोजकतां निरस्यति॥ नचे
ति॥ अ[illegible]ग्निसंयोगनास्यत्वादिति॥ [illegible]तत्वोपलक्षणं॥ अग्नेरपत्यं प्रथमं ९२
हिरण्यमित्यादावागमान्यथानुपपत्तेरप्यनुकूलतर्कसत्त्वादिति॥ एतेनाश्रय
नाशजन्यद्रवत्वनाशेव्यभिचारवारणाय द्रवत्वेआश्रयनाशनाश्यद्रवत्व
व्यावृत्तजातिविशेषंकल्पयित्वाविजातीयद्रवत्वनाशंप्रत्यग्निसंयोगत्वेनहेतु
तास्वीकार्या॥ तत्रवैजात्येसुवर्णद्रवत्वव्यावृत्तमपीतिरक्षितानुकूलतर्को न१

सुगतत्सुवर्णस्य पृथिवीत्वेपि तद्दीयद्रवत्वस्याग्निसंयोगनाश्यतावच्छेदकानाक्रांततया
अत्यंताग्निसंयोगसत्वेपि नाशापत्तेरसंभवादित्यपास्तं॥ क्षोदः॥ चूर्णं॥ तस्य पी
तिमद्गुरुत्वाश्रयस्य॥ प्रकारांतरेण सुवर्णस्य तैजसत्वं साधयतां मतमुपन्यस्यति
अप ४ [illegible]रेति सादिना॥ जलतिबंधकं॥ रूपपरावृत्तिप्रतिबंधकं॥ अग्निसंयोगस्यैतैज
।हि८॥ ससुवर्णेपि सत्वादुक्तं पीतिमेति॥ साध्येविजातीयपदमुद्रवस्यासिध्यर्थं॥ ते ॥हि९॥
तोसत्यंतमग्निसंयोगरहितेपूर्वरूपवि[illegible]जातीयरूपानाधारे घटेव्यभिचार
वारणाय अत्र हेतौ पृथिवीत्वंदेयं तेन जलपरमाणौ न व्यभिचारः॥ यथाक

135

गे१ थंचिदग्निसंयुक्ते घटे [illegible] सारणायसंतेति॥ न चाप्रयोजकमेकं त्वं॥ विरोधि
द्रवद्रव्यसंबंधं विनापार्थिवाग्निसंयोगस्यपूर्वरूपविजातीयरूपजनक
त्वादिति भावः॥ न चद्रवद्रव्यारब्ध्येदवप्रतिबंधकं वाच्यं॥ अदृष्टकल्पनाप
त्तेरिति॥ तस्य चेति॥ तस्य द्रवद्रव्यस्य पृथिवी [illegible] जलेकिंच स्येति॥ पृथिव्याः
पक्षीकृतपीतिमाश्रयविजातीयत्वाभावाज्जलस्यवत्त्वासंभवादिति भावः॥
तैजसत्वनियमादिति॥ वाय्वादौ [illegible] रूपाभावादिति भावः॥ न चांधकारेपित
रूपाश्रयद्रव्य [illegible] ग्रहापत्तिः सुवर्णरूपालोकसंयोगसत्त्वादिति वाच्यं॥ उद्भू

तानभिव्यक्तरूपालोकसंयोगस्यैवद्रव्यप्रत्यक्षेहेतुत्वात्सुवर्णरूपस्य चाभिभूतत्वात्॥
नचेतदानीं पीतरूपस्याप्युपग्रहात्सजातीयग्रहणकृतमग्रहणंनसुवर्णरूपस्येतिन
तस्याभिव्यक्तत्वमितिवाच्यं॥ लोकवृत्त्या सजातीयसंबंधस्यैवाभिभवपदार्थत्वा
त्॥ नचतथाप्यंधकारेसुवर्णसाक्षात्कारापत्तिः तेजोभिन्नद्रव्यप्रत्यक्षंप्रत्येवा
॥६१॥ लोकसंयोगस्यहेतुत्वादितिवाच्यं॥ सुवर्णभिन्नंयत्तेजस्तद्भिन्नद्रव्यप्रत्यक्षं ॥६१॥
प्रत्येवतस्यहेतुत्वादिति॥ नवीनास्तु॥ सुवर्णंपार्थिवमेवपीतंसुवर्णभूतमितिसा
क्षात्संबंधेनद्रवत्वप्रतीतेर्म्मच्छायायोगात्॥ उत्तं[illegible]तरमितिप्रतीतेर्द्रवत्वस्या

३१

प्यत्वं तोछेदात्पृथिवीत्वस्य पीतरूपसमवायिकारणतावच्छेदकत्वाद्रूपना
शोतादात्म्ये न सुवर्णस्य विरोधिसत्वेन पीतरूपनाशाऽत्तिवंदंति।।इति तोयं
थः।। ।। वायौ प्रमाणं दर्शयितुं मूलेऽपाकजानुष्णाशीतस्पर्शस्तु पवने मत इत्यु
क्तं तत्राऽपाकजादिपदानां क्रमेण व्यावृत्तिमाह।।अनुष्णाशीतस्पर्शस्येति।।
उक्तं सपाकजश्चेति।।यद्यपि अपाकजानुष्णाशीतस्पर्शवत्वं घटादावतिव्याप्तं
तथाप्यपाकजानुष्णाशीतस्पर्शवसे माप्यद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं पाक
जानुष्णाशीतस्पर्शवद्वृत्यनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वे
वानरर्थो विवक्षितः।।एतेन।।स्पर्शस्यानुष्णाशीतत्वकथनेन।।तज्जनकभावच्छेद

138

```
[OrderDescription]
,CREATED=27.08.20 14:30
,TRANSFERRED=2020/08/27 at 14:51:41
,PAGES=138
,TYPE=STD
,NAME=S0003554
,Book Name=M-1550-SIDHANTMUKTAVALI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
```

```
FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
```

```
FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
```

```
FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
```

```
FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,
```